TECHE
UDINE

MANOSCRITTI

FONDO PRINCIPALE

Manoscritto n. **P_MSS_4510**

Nel Fondo Principale sono confluiti la maggior parte dei lasciti manoscritti pervenuti alla Biblioteca Civica «Vincenzo Joppi» nel corso del tempo: si tratta perciò di un fondo composito nel quale è possibile trovare manoscritti di argomento liturgico, scientifico, giuridico, botanico e altro.

Collocazione:

Biblioteca Civica "Vincenzo Joppi", Udine
https://www.techeudine.it/fondo-principale
https://www.sbhu.it/

BIBLIOTECA CIVICA DI UDINE

BCU ms/p. 1510

BIBLIOTECA CIVICA DI UDINE

II

II

ॐ॥श्रीगणेशायनम
श्रीचंडिकायैनमः॥य
द्गुह्यंपरमंलोके। सर्व
रक्षाकरंनृणां। यन्नकस्
य चिदाख्यातं। तन्मेब्रू
हिपितामह॥१॥श्रीब्र
ह्मोवाच। अस्तिगुह्यत
मंविप्र। सर्वभूतोपका
[illegible] कारकं॥

ण्यं। तच्छृणुष्व महामुने।
॥२॥ प्रथमं शैलपुत्री च
द्वितीयं ब्रह्मचारिणी।
तृतीयं चंद्रघंटेति। कू
ष्मांडेति चतुर्थकं॥३॥ पं
चमं स्कंदमातेति। षष्ठं
कात्यायिनीति च। सप्त
मं कालरात्रीच। महागौ
रीति चाष्टमं

क्तान्येतानि नामानि। ब्रह्मणैव महात्मना। अग्निना दह्यमानः
स्तु। शत्रुमध्यगतो रणे॥५॥ विषमे दुर्गमे चैव। भयार्त्ताः शरणं गता
ः। न तेषां जायते किंचिद। शुभं रणसंकटे॥६॥ नापदं तस्य प
श्यामि। शोकदुःखभयंकरी। यैस्तु भक्त्या स्मृता नूनं। तेषां वृद्धिः
प्रजायते॥७॥ प्रेतसंस्था तु चामुंडा। वाराही महिषासना। ऐंद्री
गजसमारूढा। कौमारी शिखिवाहना। ब्राह्मी हंससमारूढा
सर्वाद्याश्च वमातरः॥८॥ सर्वास्तरणास्तु षोडश। नानारत्नोपशो
भिताः। दृश्यंते रथमारूढा। देव्याः क्रोधसमाकुलाः॥९॥ शं
खचक्रं गदाशक्तिं। हलं च मुशलायुधं। खेटकं तोमरं चैव। पर

शुंपाशमेवच ॥ २१ ॥ कुंतायुधंत्रिशूलंच शार्ङ्गमायुधमुत्तमं ॥ दै
त्यानांदेहनाशाय भक्तानामभयायच ॥ २२ ॥ धारयंत्यायु
धानि देवानांचहितायवै ॥ महाबलेमहाकाय महाभयवि
नाशनि ॥ २३ ॥ त्राहिमांदेविदुःप्रेक्ष्ये शत्रूणांभयवर्द्धिनि ॥ प्रा
च्यांरक्षतुमामैंद्री आग्नेय्यामग्निदेवता ॥ २४ ॥ दक्षिणेऽव
तुवाराही नैर्ऋत्यांखड्गधारिणी ॥ प्रतीच्यांवारुणीरक्षे
द्वायव्यांमृगवाहिनी ॥ २५ ॥ उदीच्यांरक्षकौमारी ऐशान्यांशू
लधारिणी ॥ ऊर्द्धंब्रह्माणिमेरक्षे दधस्ताद्वैष्णवीतथा ॥ २६ ॥ ए
वंदशदिशोरक्षे चामुंडाशववाहना ॥ जयामेचाग्रतःस्थातु

र्विजयास्थातुपृष्ठतः ॥ २७ ॥ अजितावामपार्श्वेतु दक्षिणेचाप
राजिता ॥ शिखामुद्योतिनिरक्षे उमामूर्ध्निव्यवस्थिता ॥ २८ ॥ मा
लाधरीललाटेच भ्रुवौरक्षेद्यशस्विनी ॥ त्रिनेत्राचभ्रुवोर्मध्ये
यमघंटाचनासिके ॥ २९ ॥ शंखिनीचक्षुषोर्मध्ये श्रोत्रयोर्द्वार
वासिनी ॥ कपोलौकालिकारक्षेत् कर्णमूलेतुशांकरी ॥ ३० ॥
नासिकायांसुगंधाच उत्तरोष्ठेचचर्चिका ॥ अधरेचामृतक
ला ॥ जिह्वायांचसरस्वती ॥ ३१ ॥ दंतान्रक्षतुकौमारी कंठदे
शेतुचंडिका ॥ घंटिकांचित्रघंटाच महामायाचतालुके ॥ ३
२ ॥ कामाक्षीचिबुकंरक्षे द्वाचंमेसर्वमंगला ॥ ग्रीवायांभद्र

कालीच। पृष्टवंशेधनुर्धरी॥२३॥ नीलग्रीवाबहीःकंठे। नलि
कांनलकूबरी॥खड्गधारिण्युभौस्कंधौ। बाहूमेवज्रधारिणी॥२
४॥ हस्तयोर्दंडिनीरक्षे। दंबीकाचांगुलीषुच। नखान्शूले
श्वरीरक्षेत। कुक्षौरक्षेन्नलेश्वरी॥२५॥ स्तनौरक्षेन्महादेवी
मनःशोकविनाशिनी। हृदयेललितादेवी। उदरेशूलधारि
णी॥२६॥ नाभौचकामिनीरक्षे। गुह्यंगुह्येश्वरीतथा। पूतना
कामिकामेढ्रंच। गुदेमहिषवाहिनी॥२७॥ कट्यांभगवतीरक्षे।
जानुनीविंध्यवासिनी। जंघेमहाबलाप्रोक्ता। सर्वकामप्र
दायिनी॥२८॥ गुल्फयोर्नारसिंहीच। पादपृष्ठेतुतैजसी।

पादांगुलीःश्रीधरीरक्षे। त्पादाधःस्थलवासिनी॥२९॥ करा
लिनाखदंतरक्षे। केशांश्चैवोर्ध्वकेशिनी। रोमकूपेषुकौमा
री। त्वचंवागीश्वरीतथा॥३०॥ रक्तमज्जावसामांसा। न्यस्थिमेदां
सिपार्वती। अंत्राणिकालरात्रीच। मुकटंमुकटेश्वरी॥३१॥
पद्मावतीपद्मकोशे। कफेचूडामणीस्तथा। ज्वालामुखीन
खज्वाला। मभेद्यासर्वसंधिषु॥३२॥ शुक्रंब्रह्माणिमेरक्षे। छा
यांछत्रेश्वरीतथा। अहंकारंमनोबुद्धिं। धर्मंमेधर्मचारि
णी॥३३॥ प्राणापानौतथाव्यानं। समानोदानमेवच। वज्रह
स्ताचमेरक्षेत। प्राणंकल्याणशोभनं॥३४॥ रसरूपेचगं

धेच। त्राहेस्थरोचेयाहिनी। सर्वंरक्षतुमेदेवी। रक्षेन्नाराय
णीतथा। ३५। आयुर्मेरक्षवाराहि। धर्मंरक्षतुवैस्नवी। य
शःकीर्तिंचलक्ष्मीच। सदारक्षतुवैस्नवी। ३६। गोत्रमिं
द्रीमेरक्षे। पशुन्मरक्षतुचंडिका। पुत्रान्रक्षेन्महालक्ष्मी। भा
३७ र्यांरक्षतुभैरवी। मार्गंक्षेमंकरीतथा। धनेश्वरीधनंरक्षत।
कौमारीकन्यकांतथा। रक्षेद्विजयासर्वतःस्थिता। ३७।
रक्षाहीनंतुयत्स्थानं। वर्जितंकवचेनतु। तत्सर्वंरक्षमेदेवी
जयंतीपापनाशिनी।। ३८।। रक्षमेसर्वगात्राणि। दुर्गेदुर्गेभ
वारिणी।। ३९।। पदमेकंनगछेत। यदीछेछुभमात्मनः। का

वचेनावृतोनित्यं। यत्रयत्रहिगछति। ४१। तत्रतत्रार्थलाभश्च। वि
जयःसर्वकामिकः। यंयंचिंतयतेकामं। तंतंलभतिनिश्चितं।
४२। परमैश्वर्यमतुलं। प्राप्नोतिविपुलंभुमौ। निर्भयोजायते
मर्त्यः। संग्रामेश्वपराजितः। ४३। त्रैलोक्येतुभवेत्पूज्यः। क[illegible]
चावृताःपुमान्। इदंतुदेव्याःकवचं। देवानामपिदुर्लभं। ४४। य
:पठेत्प्रातरुत्थाय। त्रिसंध्यंश्रद्धयान्वितः। देवीकलाभवेत्तस्य
त्रैलोक्येष्वपराजितः।। ४५।। जीवेद्वर्षशतंसाग्रं। मल्यमृत्यु
विवर्जितः। नश्यंतिव्याधयःसर्वे। लूताविस्फोटकादयः। ४६
स्थावरंजंगमंचैव। कृत्रिमंचापियद्विषं। अभिचाराणिसर्वो

णि मंत्रयंत्राणि भूतले ।४७। भूचराः खेचराश्चैव कुलजाश्चो
पदेशिकाः सहजाः कुलजा माला डाकिनी शाकिनी तथा ।४८
अंतरिक्षचरा घोरा डाकिन्यश्च महाबलाः ग्रहभूतपिशा
चाश्च यक्षगंधर्वराक्षसाः ।४९। ब्रह्मराक्षसवेताला कूष्मां
डा भैरवादयः नश्यंति दर्शनात्तस्य कवचे हृदि संस्थिते
५०। मानोन्नतिर्भवेद्राज्ञः तेजोवृद्धिकरं परं यशसा वर्द्ध
ते सोपि कीर्तिमंडितभूतले ५१ जपेत्सप्तशतीं चंडीं कृ
त्वा तु कवचं पुरा यावद्भूमंडलं धत्ते सशैलवनकाननं ५२
तावत्तिष्ठति मेदिन्यां संततिः पुत्रपौत्रकी देहांते परमं स्था

नं यत्सुरैरपि दुर्लभं ५३ प्राप्नोति पुरुषो नित्यं महामाया
प्रसादतः मनसा चिंतितं कार्यं तत्सर्वं सफलं भवेत् ।५४। इति
श्रीहरिहरब्रह्मविरचितं देव्याः कवचं समाप्तं ॥ ॥ ॐ नमश्चं
डिकायै ॥ ॐ ॥ ॐ नमः ॥ जयंती मंगला काली भद्रकाली क
पालिनी दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तु ते ।१। मधुकै
टभविद्राविविधात्री वरदे नमः । रूपं देहि जयं देहि यशो देहि द्वि
षो जहि ।२। महिषासुरनिर्नाशि विधात्री वरदे नमः रूपं दे
हि ।३। रक्तबीजवधे देवि चंडमुंडविनाशिनि रूपं देहि ।४। शुं
भस्यैव निशुंभस्य धूम्राक्षस्य च मर्दिनि रूपं देहि ।५। वंदि

ताङ्घ्रियुगे देवि । देहि सौभाग्यदायिनी । रूपं० ॥ ६ ॥ अचिंत्य
रूपचरिते । सर्वशत्रुविनाशिनि । रूपं० ॥ ७ ॥ नतेभ्यः सर्व
दा भक्त्या । चंडिके दुरितापहे । रूपं० ॥ ८ ॥ स्तुवद्भ्यो भक्तिपूर्वं
त्वां । चंडिके व्याधिनाशिनि । रूपं० ॥ ९ ॥ चंडिके सततं य
ये । अर्चयंतीह भक्तितः । रूपं० ॥ १० ॥ देहि सौभाग्यमा
रोग्यं । देहि देवि परं सुखं । रूपं० ॥ ११ ॥ विदेहि द्विषतां ना
शं । विधेहि बलमुच्चकैः । रूपं० ॥ १२ ॥ विधेहि देवि कल्या
णं । विधेहि विपुलां श्रियं । रूपं० ॥ १३ ॥ सुरासुरशिरोरत्न
निघृष्टचरणे ऽम्बिके । रूपं० ॥ १४ ॥ विद्यावंतं यशस्वंतं । ल

क्ष्मीवंतं जनं कुरु । रूपं० ॥ १५ ॥ प्रचंडदैत्यदर्पघ्ने । चंडिके
प्रणताय मे । रूपं० ॥ १६ ॥ देवि प्रचंडदोर्दंड । दैत्यदर्पवि
नाशिनि । रूपं दे० ॥ १७ ॥ चतुर्भुजे चतुर्वक्त्र । संस्तुते परमे
श्वरी । रूपं० ॥ १८ ॥ कृष्णेन संस्तुते देवि । शश्वद्भक्त्या सदां
बिके । रूपं० ॥ १९ ॥ हिमाचलसुतानाथ । संस्तुते परमेश्वरि
रूपं० ॥ २० ॥ इंद्राणीपतिसद्भाव । पूजिते परमेश्वरी ॥ रू
पं० ॥ २१ ॥ देवि भक्तजनोद्दाम । दत्तानंदोदयेंबिके । रूपं
॥ २२ ॥ पत्नीं मनोरमां देहि । मनोवृत्तानुसारिणीं । तारिणी
दुर्गसंसारसागरस्य कुलोद्भवां ॥ २३ ॥ इदं स्तोत्रं पठित्वा

तु महाम्नायोपरेश्वरः ॥ १
सर्वः समस्तगतं संस्था ॥ ब
स्माप्नोति संपदः ॥ इत्य
र्णास्तुतिः ॥ २ ॥ ॥ वि
शुद्धज्ञानदेहाय । त्रिवे
दीदिव्यचक्षुषे । श्रेयः
प्राप्तिनिमित्ताय नमः सो
मार्द्धधारिणे ॥ १ ॥ सर्वाम
ताह्वनायास्तु । मंत्राणाम

त्रिकालज्ञं सोऽपि क्षेममवाप्नोति सततं जायते तत्परः ॥ ३ ॥ सि
द्ध्युच्चाटनादीनि वस्तूनि सकलान्यपि । एतेन स्तुवतां देवी
स्त्वाद्धृद्वेदन संशयः ॥ ३ ॥ न मंत्रं नौषधं तत्र । न किंचिदपि वि
द्यते । विनैतत्सिद्ध्यते यत्र । सर्वोच्चाटनादिकं ॥ ४ ॥ समस्ता
न्यपि सिद्ध्यंति लोके ऽस्याः कामिमानदः । कृत्वा नित्यं त्रयामास । स
र्वमेव मिदं स्तुतं ॥ ५ ॥ स्त्रांतेस्य खंडिकायास्तु । तद्वद्गुहं स्वकार
सः । समाधायं सगुणेषु न । तां यथा वक्रमंत्रिणां ॥ ६ ॥ सोऽपि क्षेमं म
मवाप्नोति । सर्वमेव न संशयः । कृत्वा यं यावद्वर्हन्नया । मण्डप
वा समाहितः ॥ ७ ॥ ददाति प्रतिष्ठिताति । नान्यापेयाऽसिद्ध्या ।

ति। इत्थंरूपेण कीलेन। महादेवेन कीलितं। ९। यो निकीलं र
विधायैनां। नित्यं जपति संस्फुटं। स सिद्धः सगणः सोपि गंध
र्व्वो जायते वने। १०। न चैवाप्यटतस्तस्य। भयं क्वापीह जायते
नापमृत्युवशं याति। मृतो मोक्षमवाप्नुयात्। ११। ज्ञात्वा प्रा
रभ्य कुर्वीत। अकुर्वाणो विनश्यति। ततो ज्ञात्वैव संपन्न मि
दं प्रारभ्यते बुधैः। १२। सौभाग्यादि च यत्किंचित्। दृश्यते लल
नाजने। तत्सर्वं तत्प्रसादेन। तेन जाप्यमिदं शुभं। १३। शनैस्तु
जप्यमानेस्मिन्। स्तोत्रे संपत्तिरुच्चकैः। भवत्येव समग्रापि
ततः प्रारभ्यमेव तत्। १४। ऐश्वर्यं यत्प्रसादेन। सौभाग्यारो

ग्य संपदः। शान्तिर्हानिः परो मोक्षः
स्तूयते सा न किं जनैः॥ इति श्री
स्वायंभुवागमे श्रीमहादेवीमाहा
त्म्ये भगवत्याः कीलकस्तुतिः समाप्ता
॥३॥ ॥ या माया परापरा
रक्षा। रक्तप्रस्थारक्तसुकुंभिणी॥
चंडमंडलमध्यस्था। आद्या हिम
ममंडले॥४॥ इत्यादौ मने। अन्य
या हिमकाक्ष्यात। पिंगलामसं

[illegible]
गिमहाकालीदेवता गायत्री
छंदः। नंदाशक्तिः रक्तदं
तिकाबीजं अग्निस्तत्वं महा
कालीप्रत्यर्थे प्रथमचरितस्य
[illegible] विनियोगः॥ ॥तपस्यं
तं महात्मानं। मार्कंडेयं म
हामुनिं। व्यासशिष्यो महा
जा। जैमिनिः परिपृच्छति



मजाह्नी । छिन्नवर्थेखमेधसः । प्रसांतश्चापदाकीर्णं मुनिश्रिया
पञ्चालितं ॥ २० ॥ तस्यैकां किंचित्कालं च मुनिनातेन संस्कृतः
इत्याश्चतस्य विचरं स्तस्मिन्मुनिवराश्रमं ॥ २१ ॥ सोचिंतयत्तद
तत्र ॥ ममचाकृष्टमानसः ॥ मत्ताद्वैणपालितं सर्वं मयाद्वीन उरं
हितत ॥ २२ ॥ मदत्योक्ते रसहोत्व । देमेतःपाल्यतेनवा । नूला
नृसुप्रधानोम । स्वैराद्वस्तीमहामदः ॥ २३ ॥ ममाविरीवद्वंप्याः
तः । कान्नत्लागानुपलक्ष्यते । व्यमस्मानुगतानित्यं प्रसादधन
नाजाने ॥ २४ ॥ अनुष्टात्रिंकवंतस्य । कंईत्यनामद्वीरतां । अ
समयग्राह्यञ्चालीस्तः । कर्मोद्धिःसततंव्यदं ॥ २५ ॥ संचिंतःसो

तिडःखेन। क्षयंकोशोगमिष्यति
एतच्चान्यच्चसततं। चिंतयामासपा
र्थिवः॥२६॥ तत्रविप्राश्रमाभ्याशे
वैश्यमेकंददर्शसः। सपृष्टस्तेनक
स्त्वंभो। हेतुश्चागमनेत्रकः॥२७॥ स
शोकइवकस्मात्वं। दुर्मनाइवल
क्ष्यसे। इत्याकर्ण्यवचस्तस्य। भूप
तेः प्रणयोदितं॥२८॥ प्रत्युवाचसतं
वैश्यः। प्रश्रयावनतोनृपं॥ वैश्यउ

उवाच॥ समाधिर्नामवै
श्योहं। उत्पन्नोधनिनां
कुले॥२९॥ पुत्रदारैर्नि
रस्तश्च। धनलोभादसा
धुभिः। विहीनःस्वजनै
र्दारैः। पुत्रैरादायमे
धनं॥३०॥ वनमभ्यागतो
दुःखी। निरस्तश्चाप्तबंधु
भिः। सोहंनवेद्मिपुत्रा

णां॥ कुशलाकुशलात्मिकां॥ २१॥ प्रवृत्तिंस्वजनानांच दारा
णांचात्रसंस्थितः॥ किंनुतेषांगृहेक्षेम मक्षेमंकिंनुसांप्रतं॥ २२॥
कथंतेकिंनुसद्वृत्ता दुर्वृत्ताः किंनुमेसुताः॥ राजोवाच॥ यै
र्निरस्तोभवांल्लुब्धैः पुत्रदारादिभिर्धनैः॥ २३॥ तेषुकिंभवत
ः स्नेह मनुबध्नातिमानसं॥ वैश्यउवाच॥ एवमेतद्यथाप्रा
ह॥ भवानस्मद्गतंवचः॥ २४॥ किंकरोमिनबध्नाति॥ ममनिष्ठु
रतांमनः॥ यैःसंत्यज्यपितृस्नेहं धनलुब्धैर्निराकृतः॥ २५॥
पतिस्वजनहार्दंच॥ हार्दितेष्वेवमेमनः॥ किमेतन्नाभिजाना
मि॥ जानन्नपिमहामते॥ २६॥ यत्प्रेमप्रवणंचित्तं॥ विगुणेष्वपि

पिबंधुषु॥ तेषांकृतेमेनिःश्वासो॥ दौर्मनस्यंचजायते॥ २७॥ करो
मिकिंयन्नमनः स्तेष्वप्रीतिषुनिष्ठुरं॥ श्रीमार्कंडेयउवाच॥
ततस्तौसहितौविप्र॥ तंमुनिंसमुपस्थितौ॥ २८॥ समाधिर्नाम
वैश्योसौ॥ सचपार्थिवसत्तमः॥ कृत्वातुतौयथान्यायं॥ यथार्हं
तेनसंविदं॥ २९॥ उपविष्टौकथाःकाश्चि॥ च्चक्रतुर्वैश्यपार्थिवौ
॥ राजोवाच॥ भगवंस्त्वामहंप्रष्टु॥ मिच्छाम्येकंवदस्वतत्॥ ३०॥
दुःखायमेमनसः॥ स्वचित्तायत्ततांविना॥ ममत्वंगतराज्य
स्य॥ राज्यांगेष्वखिलेष्वपि॥ ३१॥ जानतोपियथाज्ञस्य॥ किमे
तन्मुनिसत्तमः॥ अयंचनिःकृतःपुत्रै॥ दारैर्भृत्यैस्तथोज्झितः

३२ । स्वजनैरपिसंत्यक्तः । स्तेषुहार्दीतथाप्यति । एवमेषतथा
हंच । द्वावप्यत्यंतदुःखितौ । ३३ । दृष्टदोषेपिविषये ममत्वा
कृष्टमानसौ । तत्किमेतन्महाभाग । यन्मोहोज्ञानिनोरपि ।
३४ ममास्यचभवत्येषा । विवेकांधस्यमूढता ॥ ऋषिरुवाच ॥
ज्ञानमस्तिसमस्तस्य । जंतोर्विषयगोचरे । ३५ । विषयाश्चम
हाभाग । यांतिचैवंपृथक्पृथक् । दिवांधाःप्राणिनःकेचि
द्रात्रावंधास्तथापरे । ३६ । केचिद्दिवातथारात्रौ प्राणिनस्तु
ल्यदृष्टयः । ज्ञानिनोमनुजाःसत्यं । किंतुतेनहिकेवलं ।
३७ । यतोहिज्ञानिनःसर्वे पशुपक्षिमृगादयः । ज्ञानंचतः १

न्मनुष्याणां । यत्तेषांमृग
पक्षिणां । ३८ । मनुष्याणां
चयत्तेषां । तुल्यम
न्यत्तथोभयोः । ज्ञानेपि
सतिपश्यैतान् । पतंगा
न्शावचंचुषु । ३९ । क
णमोक्षादृतान्मोहात् । पी
ड्यमानानपिक्षुधा । मा
नुषामनुजव्याघ्र । साभि

निलाषाः सुतान्प्रति ॥ ४७ ॥ लोभात्प्रत्युपकाराय । नन्वेता
त्किं न पश्यसि । तथापि ममतावर्त्ते । मोहगर्ते निपातिताः ॥ ४
८ ॥ महामायाप्रभावेन । संसारस्थितिकारिणा । तन्नात्र वि
स्मयः कार्यो योगनिद्रा जगत्पतेः ॥ ४९ ॥ महामाया हरे
श्चैषा । तया संमोह्यते जगत् । ज्ञानिनामपि चेतांसि । दे
वी भगवती हि सा ॥ ५० ॥ बलादाकृष्य मोहाय । महामाया प्र
यच्छति । तया विसृज्यते विश्वं । जगदेतच्चराचरं ॥ ५१ ॥ सैषा प्र
सन्ना वरदा नृणां भवति मुक्तये । सा विद्या परमा मुक्ते । र्हेतुभू
ता सनातनी ॥ ५२ ॥ संसारबंधहेतुश्च । सैव सर्वेश्वरेश्वरी ॥ ५

॥ भगवन्का
हि सा देवी । महामायेति
यां भवान् ॥ ५४ ॥ ब्रवीति ।
कथमुत्पन्ना । कर्मास्या
श्च किं द्विजः । यत्स्व
भावा च सा देवी । यत्स्वरू
पा यदुद्भवा ॥ ५५ ॥ तत्स
र्वं श्रोतुमिच्छामि । त्वत्तो ब्र
ह्मविदां वर ॥ ५६ ॥ ऋषिरु...

वाच॥ नित्यैवसाजग
न्मूर्त्तिस्तयासर्वमिदं।
ततं॥४८॥ तथापितत्स
मुत्पत्तिर्बहुधाश्रूयतां
मम। देवानांकार्य
सिद्ध्यर्थमाविर्भवतिसा
यदा॥४९॥ उत्पन्नेति
तदालोकेसानि
त्याप्यभिधीयते। योग

निद्रांयदाविष्णुर्जगत्येकार्णवीकृते॥५०॥ आस्तीर्यशेषम
भजत्कल्पांतेभगवान्प्रभुः। तदाद्वावसुरौघोरौ। विख्या
तौमधुकैटभौ॥५१॥ विष्णुकर्णमलोद्भूतौ। हंतुंब्रह्माणमु
द्यतौ। सनाभिकमलेविष्णोः। स्थितोब्रह्माप्रजापतिः॥५२॥
दृष्ट्वातावसुरौचोग्रौ। प्रसुप्तंचजनार्दनं। तुष्टावयोगनिद्रां
तां। एकाग्रहृदयस्थितः॥५३॥ विबोधनार्थायहरेर्हरि
नेत्रकृतालयां॥ ब्रह्मोवाच॥ विश्वेश्वरींजगद्धात्रीं। स्थिति
संहारकारिणीं॥५४॥ स्तौमिनिद्रांभगवतीं। विष्णोरतुल
तेजसः। त्वंस्वाहात्वंस्वधात्वंहिवषट्कारस्वरात्मिका॥५५

जगतीस्य जगन्मये।७६

सुधा त्वमक्षरे नित्ये। त्रिधा मात्रात्मिका स्थिता। अर्द्धमात्रा
स्थिता नित्या। यानुच्चार्या विशेषतः॥७६॥ त्वमेव संध्या सावि
त्री। त्वं देव जननी परा। त्वयैतद्धार्यते विश्वं। त्वयैतत्सृज्य
ते जगत॥७७॥ त्वयैतत्पाल्यते देवी। त्वमत्स्यंते च सर्वदा। वि
सृष्टौ सृष्टिरूपा त्वं। स्थितिरूपा च पालने॥७८॥ तथा संहृ
तिरूपा त्वं। महाविद्या महामाया। महामेधा महास्मृतिः।
॥७९॥ महामोहा च भगवती। महादेवी महेश्वरी। प्रकृतिस्त्वं च
सर्वस्य। गुणत्रयविभावनी॥८०॥ कालरात्रिर्महारात्रि मो
हरात्रिश्च दारुणा। त्वं श्रीस्त्वमीश्वरी त्वं ह्री। त्वं बुद्धिर्बोधल

क्षणा॥८१॥ लज्जा पुष्टिस्तथा तुष्टि। स्त्वं शांतिः क्षांतिरेव च। खड्गिनी॥ शू
लिनी घोरा। गदिनी चक्रिणी तथा॥८२॥ शंखिनी चापिनी बाणा। भुशु
ण्डी परिघायुधा। सौम्या सौम्यतराशेष। सौम्येभ्यस्त्वतिसुंदरी॥८
३॥ परापराणां परमा। त्वमेव परमेश्वरी। यच्च किंचित्क्वचिद्वस्तु
सदसद्वाखिलात्मिके॥८४॥ तस्य सर्वस्य या शक्तिः। सा त्वं किं स्तूय
से मया। यया त्वया जगत्स्रष्टा। जगत्पात्यत्ति यो जगत॥८५॥ सोपि
निद्रावशं नीतः। कस्त्वां स्तोतुमिहेश्वरः। विष्णुः शरीरग्रहणम
हमीशान एव च॥८६॥ कारितास्ते यतोतस्त्वां कः स्तोतुं शक्तिमा
न्भवेत। सा त्वमित्थं प्रभावैः स्वै रुदारैर्देवि संस्तुता॥८७॥ मोह

रक्षतौ ऽसुरावुग्रौ वधरौ मधुकैटभौ। प्रबोधं च जगत्स्वामी। नीयतामः
च्युतो लघु। ६८। बोधश्च क्रियतामस्य। हन्तुमेतौ महासुरौ॥ ऋषि
रुवाच॥ एवं स्तुता तदा देवी। तामसी तत्र वेधसा। ६९. विष्णोः प्रबो
धनार्थाय। निहन्तुं मधुकैटभौ। नेत्रास्यनासिकाबाहु। हृदयेभ्य
स्तथोरसः॥ ७०। निर्गम्य दर्शने तस्थौ। ब्रह्मणोऽव्यक्तजन्मनः। उत्त
स्थौ च जगन्नाथ। स्तया मुक्तो जनार्दनः॥ ७१। एकार्णवेऽहिशयना
ततः स ददृशे च तौ। मधुकैटभौ दुरात्मानौ। अतिवीर्यपराक्रमौ। ७२
क्रोधरक्तेक्षणौ हन्तुं। ब्रह्माणं जनितोद्यमौ। समुत्थाय ततस्ताभ्यां।
युयुधे भगवान् हरिः॥ ७३॥ पंचवर्षसहस्राणि। बाहुप्रहरणो विभु

ः। तावप्यतिबलोन्मत्तौ। महामायाविमोहितौ॥ ७४। उक्तवन्तौ
वरोऽस्मत्तो। व्रियतामिति केशवं॥ श्रीभगवानुवाच॥ भवेतामः
द्य मे तुष्टौ। मम वध्यावुभावपि। ७५। किमन्येन वरेणात्र। एताव
द्धि वृतं मया॥ ऋषिरुवाच॥ वंचिताभ्यामिति तदा। सर्वमापोमयं
यं जगत्। ७६। विलोक्य ताभ्यां गदितो। भगवान् कमलेक्षणः।
प्रीतौ स्वस्तव युद्धेन। श्लाघ्यस्त्वं मृत्युरावयोः॥ ७७। आवां जहि
न यत्रोर्वी। सलिलेन परिप्लुता॥ ऋषिरुवाच॥ तथेत्युक्त्वा भगः
वता। शंखचक्रगदाभृता। ७८। कृत्वा चक्रेण वै छिन्ने। जघने
शिरसी तयोः॥ एवमेषा समुत्पन्ना। ब्रह्मणा संस्तुता स्वयं। ७९॥

इत्ताावमस्यादेव्यास्व
सृय:शृणुवदामिते॥१॥
प्रथमः॥इतिश्रीमार्कंडे
यपुराणेसावर्णिकेम
न्वंतरेदवीरुभगवती
माहात्म्येमधुकैटभव
धः॥१॥ ममम्मरितम
िचतुरुत्पयिमेदा लक्ष्
्दवताचाविक्षापदः

न्यांनरीश्रमतिडगोमीजवायुरत्नभमदा श्रीमा ... त्यर्थ ...
नियोगः॥ ऋषिरुवाच॥ देवासुरमभूद्युद्धं पूर्णमब्दशतंपुरा महि
षेसुराणामधिपे देवानांचपुरंदरे १ तत्रासुरैर्महावीर्यै देवा
सैन्यंपराजितं जित्वाचसकलान्देवा निंद्रोभून्महिषासुरः २
ततःपराजितादेवाः पद्मयोनिंप्रजापतिं पुरस्कृत्यगतास्तत्र य
त्रेशगरुडध्वजौ ३ यथावृत्तंतयोस्तद्व न्महिषासुरचेष्टितं ।
त्रिदशाःकथयामासु र्देवाभिभवविस्तरं ४ सूर्येंद्राग्न्यनिलें
दूनां यमस्यवरुणस्यच अन्येषांचाधिकारान्स स्वयमेवाधि
तिष्ठति ५ स्वर्गान्निराकृताःसर्वे तेनदेवगणाभुवि विचरंति१

यथामर्त्या। महिषेणदुरात्मना ६ एतद्वः कथितं सर्वममरारिवि।
चेष्टितं। शरणं वः प्रपन्नाः स्मो। वधस्तस्य विचिंत्यतां ७ ऋषिरु
वाच। इत्थं निशम्य देवानां। वचांसि मधुसूदनः। चकार कोपं शं
भुश्च। भ्रुकुटीकुटिलाननौ ८ ततोऽतिकोपपूर्णस्य। चक्रिणो
वदनात्ततः। निश्चक्राम महत्तेजो। ब्रह्मणः शंकरस्य च ९ अ
न्येषां चैव देवानां। शक्रादीनां शरीरतः। निर्गतं सुमहत्तेजः। स्त
च्चैक्यं समगच्छत १० अतीव तेजसः कूटं। ज्वलंतमिव पर्वतं द
दृशुस्ते सुराः तत्र। ज्वालाव्याप्तदिगंतरं ११ अतुलं तत्र तत्ते
जः सर्वदेवशरीरजं। एकस्थं तदभून्नारी। व्याप्तलोकत्रयं त्वि

३

षा १२ यदभूच्छांभवं तेजस्तेनाजायत तन्मुखं। याम्येन चाभव
न्केशा। बाहवो विष्णुतेजसा १३ सौम्येन स्तनयोर्युग्मं मध्यं
चैंद्रेण चाभवत्। वारुणेन च जंघोरू। नितंबस्तेजसा भुवः १४।
ब्रह्मणस्तेजसा पादौ। तदंगुल्योऽर्कतेजसा। वसूनां च करांगुल्यः
कौबेरेण च नासिका १५ तस्यास्तु दंताः संभूताः। प्राजापत्येन
तेजसा। नयनत्रितयं जज्ञे। तथा पावकतेजसा १६ भ्रुवौ च संध्य
योस्तेजः। श्रवणावनिलस्य च। अन्येषां चैव देवानां। संभवस्तेज
सां शिवा १७ ततः समस्तदेवानां। तेजोराशिसमुद्भवां। तां विलो
क्य मुदं प्रापु। रमरा महिषार्दिताः १८ ततो देवा ददुस्तस्यै स्वा

निस्वान्मोमुचुश्च यानि च । ऊचुर्ज्जयजयेत्युच्चै । ज्योयंती तेजसे योगिण
: १९ शूलं शूलाद्विनिकृष्य । दद्दौ तस्यै पिनाकधृक् । चक्रं च दत्ता
तवान्कृष्णः । समुत्पाद्य स्वचक्रतः । २० शंखं च वरुणः शक्तिं ।
दद्दौ तस्यै हुताशनः । मारुतो दत्तवांश्चापं । बाणपूर्णे तथेषुधी
२१ वज्रमिंद्रः समुत्पाद्य । कुलिशादमराधिपः २२ दद्दौ तस्यै
सहस्राक्षो । घंटामैरावताद्गजात् । कालदंडाद्यमो दंडं । पाशं चां
बुपतिर्द्ददौ । २३ प्रजापतिश्चाक्षमालां । दद्दौ ब्रह्मा कमंडलुं । स
मस्तरोमकूपेषु । निजरश्मीन्दिवाकरः । २४ कालश्च दत्तवा
न्खड्गं तस्याश्चर्म्म च निर्म्मलं । क्षीरोदश्चामलं हार । मजरे च तथां

२

बरे । २५ चूडामणिं तथा दिव्यं । कुंडले कटकानि च । अर्द्धचंद्रं तथा
शुभ्रं । केयूरान्सर्वबाहुषु । २६ नूपुरौ विमलौ तद्व । ग्रैवेयक
मनुत्तमं । अंगुलीयकरत्नानि । समस्तास्वंगुलीषु च । २७ विश्व
कर्म्मा दद्दौ तस्यै । परशुं चातिनिर्म्मलं । अस्त्राण्यनेकरूपाणि
तथाभेद्यं च दंशनं । २८ अम्लानपंकजां मालां । शिरस्युरसि चाप
रां । अददज्जलधिस्तस्यै । पंकजं चातिशोभनं । २९ हिमवान्वा
हनं सिंहं । रत्नानि विविधानि च । ददावशून्यं सुरया । पानपात्रं धना
धिपः । ३० शेषश्च सर्वनागेशो । महामणिविभूषितं । नागहा
रं दद्दौ तस्यै । धत्ते यः पृथिवीमिमां । ३१ अन्यैरपि सुरैर्देवी भूष

ण्णैरायुधैस्तथा। संमानिता ननादोच्चैः। साट्टहासं मुहुर्मुहुः॥ ३
२। तस्या नादेन घोरेण। कृत्स्नमापूरितं नभः। अमायतातिमह
ता प्रतिशब्दो महानभूत्। ३३। चुक्षुभुः सकला लोकाः। समुद्रा
श्च चकंपिरे। चचाल वसुधा चेलुः सकलाश्च महीधराः। ३४। ज
येतिव मुदा देवा। तामूचुः सिंहवाहनीं। तुष्टुवुर्मुनयश्चैनां। भ
क्तिनम्रात्ममूर्तयः। ३५। दृष्ट्वा समस्तं संक्षुब्धं। त्रैलोक्यममरारय
ः सन्नद्धाखिलसैन्यास्ते। समुत्तस्थुरुदायुधाः। ३६। आः किमे
तदिति क्रोधा। दाभाष्य महिषासुरः। अभ्यधावत तं शब्द। मशेषै
रसुरैर्वृतः। ३७। स ददर्श ततो देवीं। व्याप्तलोकत्रयं त्विषा। पादा

३

क्रांत्या नतभुवं। किरीटोल्लिखितांबरां। ३८। क्षोभिताशेषपाता
लां। धनुर्ज्यानिःस्वनेन तां। दिशो भुजसहस्रेण। समंताद्व्याप्य
संस्थितां। ३९। ततः प्रववृते युद्धं। तया देव्या सुरद्विषां। शस्त्रास्त्रै
र्बहुधा मुक्तै। रादीपितदिगंतरं। ४०। महिषासुरसेनानी। श्चिक्षु
राख्यो महासुरः। युयुधे चामरश्चान्यै। श्चतुरंगबलान्वितः। ४१। र
थानामयुतैः षड्भिः। रुदग्राख्यो महासुरः। अयुध्यतायुतानां च
सहस्रेण महाहनुः। ४२। पंचाशद्भिश्च नियुतै। रसिलोमा महा
सुरः। अयुतानां शतैः षड्भि। र्बाष्कलो युयुधे रणे। ४३। गजवा
जिसहस्रौघै। रनेकैरुग्रदर्शनः। वृतो रथानां कोट्या च १

युद्धेतस्मिन्नयुध्यत।४४।बिडालाख्योमहादैत्यः।पंचाशद्भि
रथायुतैः।युयुधेसंयुगेतत्र।रथानांपरिवारितः।४५।वृत
ःकालोरथानांच।रणेपंचाशतायुतैः।युयुधेसंयुगेतत्र।ता
वद्भिःपरिवारितः।४६।अन्येचतत्रायुतशो।रथनागहयैर्वृ
ताः।युयुधुःसंयुगेदेव्याः।सहतत्रमहासुराः।४७।कोटिको
टिसहस्रौघैः।रथानांदंतिनांतथा।हयानांचवृतोयुद्धे।त
त्राभून्महिषासुरः।४८।तोमरैर्भिंडिपालैश्च।शक्तिभिर्मुश
लैस्तथा।युयुधुःसंयुगेदेव्याः।खड्गैःपरशुपट्टिशैः।४९।
केचिच्चचिक्षिपुःशक्तीः।केचित्पाशांस्तथापरे।देवींखड्गप्र २८

हारैस्तु।ततोहंतुंप्रचक्रमुः।५०।सापिदेवीततस्तानि।शस्त्रा
ण्यस्त्राणिचंडिका।लीलयैवप्रचिच्छेद।निजशस्त्रास्त्रवर्षिणी
।५१।अनायस्ताननादेवी।स्तूयमानासुरर्षिभिः।मुमोचासुर
देहेषु।शस्त्राण्यस्त्राणिचेश्वरी।५२।सोपिक्रुद्धोधुतसटो।देव्या २
वाहनकेसरी।चचारासुरसैन्येषु।वनेष्विवहुताशनः।
५३।निश्वासान्मुमुचेयांश्च।युध्यमानारणेंबिका।तएवसद्य
ःसंभूता।गणाःशतसहस्रशः।५४।युयुधुस्तेपरशुभि।र्भिंडिपा
लासिपट्टिशैः।नाशयंतोसुरगणान्।देवीशक्त्युपबृंहिताः।५
५।अवादयंतःपटहान्।गणाःशंखांस्तथापरे।मृदंगांश्चता

यैवान्ये । तस्मिन्युद्धे महोत्सवे ।५६। ततो देवी त्रिशूलेन गदया
शरवृष्टिभिः खड्गादिभिश्च शतशो निजघान महासुरान् ।५७।
पातयामास चैवान्यान् घंटास्वनविमोहितान् । असुरान्भु
वि पाशेन बद्ध्वा चान्यानकर्षयत् ।५८। केचिद्द्विधाकृतास्ती
क्ष्णैः खड्गपातैस्तथापरे । विपोथिता निपातेन गदया भुवि शे
रते ।५९। वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः । केचिन्निप
तिता भूमौ भिन्नाः शूलेन वक्षसि ।६०। निरंतराः शरौघेण ।
कृताः केचिद्रणाजिरे । श्येनानुकारिणः प्राणान् मुमुचुस्त्रि
दशार्दनाः ।६१। केषांचिद्बाहवश्छिन्नाः छिन्नग्रीवास्तथापरे ।

शिरांसि पेतुरन्येषा । मन्येमध्ये विदारिताः ।६२। विच्छिन्नजंघास्त्वपरे ।
पेतुरुर्व्यां महासुराः । एकबाह्वक्षिचरणाः । केचिद्देव्या द्विधाकृता
ः ।६३। छिन्नेपि चान्ये शिरसि पतिताः पुनरुत्थिताः । कबंधा युयुधु
र्देव्या गृहीतपरमायुधाः ।६४। ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रि
ताः । कबंधाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः ।६५। तिष्ठतिष्ठेति
भाषंतो देवीमन्ये महासुराः । तिष्ठतिष्ठेति चोवाच्या देव्यान्योयुयु
धुर्मृधे ।६६। रुधिरौघविलुप्तांगाः संग्रामे लोमहर्षणे । पातितै र
थनागाश्वै रुधिरैश्च वसुंधरा । अगम्या साभवत्तत्र यत्राभूत्स म
हारणः ।६७। शोणितौघा महानद्यः सद्यस्तत्र विसुस्रुवुः । मध्ये

२६
२५

वासुरसैन्यस्य वारणासुरवाजिनां ॥६९ क्षणेनतन्महासैन्य म
सुराणांतथांबिका । निन्येक्षयंयथावह्नि स्तृणदारुमहाचयं
॥ स च सिंहोमहानाद मुत्सृजन्धुतकेसरः । शरीरेभ्योमरा
रीणा । मसूनिवविचिन्वति ॥७० देव्यागणैश्चतैस्तत्र । कृतंयुद्धं
तथासुरैः । यथैषांतुतुषुर्देवाः पुष्पवृष्टिमुचोदिवि ॥७१

श्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येमहिषा
सुरसैन्यवधो ॥२॥ ॥ऋषिरुवाच ॥ निहन्यमानंतत्सैन्य म
वलोक्यमहासुरः । सेनानीश्चिक्षुरःकोपा द्ययौयोद्धुमथांबिकां
॥ सदेवींशरवर्षेण । ववर्षसमरेऽसुरः । यथामेरुगिरेःशृंगं तो

मवर्षेणतोयदः। २। तस्यछित्वाततोदेवी। लीलयैवशरोत्करा
।जघानतुरगान्बाणै। र्यंतारंचैववाजिनां। ३। चिच्छेदचधनुःस
द्यो। ध्वजंचातिसमुच्छ्रितं। विव्याधचैवगात्रेषु। छिन्नधन्वानमाशुगैः
४। सछिन्नधन्वाविरथो। हताश्वोहतसारथिः। अभ्यधावततांदे
वीं। खड्गचर्मधरोसुरः। ५। सिंहमाहत्यखड्गेन। तीक्ष्णधारेणमू
र्ध्नि। आजघानभुजेसव्ये। देवीमप्यतिवेगवान्। ६। तस्याःख
ड्गोभुजंप्राप्य। पफालनृपनंदन। ततोजग्राहशूलंच। कोपादरु
णलोचनः। ७। चिक्षेपचततस्तत्तु। भद्रकाल्यांमहासुरः। जाज्व
ल्यमानंतेजोभी। रविबिंबमिवांबरात्। ८। दृष्ट्वातदापतच्छूलं। दे

२७

वीशूलममुंचत। तेनतच्छतधानीतं। शूलंसचमहासुरः। ९। हतेतस्मि
न्महावीर्ये। महिषस्यचमूपतौ। आजगामगजारूढ। श्चामरस्त्रिदशा
र्दनः। १०। सोपिशक्तिंमुमोचाथ। देव्यास्तामंबिकाद्रुतं। हुंकारा
भिहतांभूमौ। पातयामासनिःप्रभां। ११। भग्नांशक्तिंनिपतितां। दृष्ट्वाक्रो
धसमन्वितः। चिक्षेपचामरःशूलं। बाणैस्तदपिसाछिनत्। १२। त
तःसिंहःसमुत्पत्य। गजकुंभांतरेस्थितः। बाहुयुद्धेनयुयुधे। ते
नोच्चैस्त्रिदशारिणा। १३। युध्यमानौततस्तौतु। तस्मान्नागान्महीं
गतौ। युयुधातेतिसंरब्धौ। प्रहारैरतिदारुणैः। १४। ततोवेगा
त्खमुत्पत्य। निपत्यचमृगारिणा। करप्रहारेणशिर। श्चामरस्य

पृथक्कृतं ॥ २५ ॥ उदग्रश्च रणे देव्या । शिलावृक्षादिभिर्हतः । दंत
मुष्टितलैश्चैव करालश्च निपातितः ॥ २६ ॥ देवी क्रुद्धा गदापातैश्चू
र्णयामास चोद्धतं । बाष्कलं भिंडिमालेन । बाणैस्ताम्रं तथांधकं ।
२७ । उग्रास्यमुग्रवीर्यं च । तथैव च महाहनुं । त्रिनेत्रा च त्रिशूलेन । ज
घान परमेश्वरी ॥ २८ ॥ बिडालस्यासिना कायात् । पातयामास
वै शिरः । दुर्धरं दुर्मुखं चोभौ । शरैर्निन्ये यमक्षयं ॥ २९ ॥ कालं
च कालदंडेन । कालरात्रिरपातयत् । उग्रदर्शनमत्युग्रैः खड्गपा
तैरताडयत् ॥ ३० ॥ असिनैवासिलोमानमच्छिदत्सा रणे भव ग
णैः सिंहेन देव्या च । जयक्ष्वेडाकृतोत्सवैः ॥ ३१ ॥ एवं संक्षीयमा

२१

णे तु । स्वसैन्ये महिषासुरः । माहि
षेण स्वरूपेण । त्रासयामास तान्
गणान् ॥ ३२ ॥ कांश्चित्तुंडप्रहारे
ण खुरक्षेपैस्तथापरान् । लांगू
लताडितांश्चान्यान् शृंगाभ्यां च
विदारितान् ॥ ३३ ॥ वेगेन कांश्चिद
परान् । नादेन भ्रमणेन च । निश्वा
सपवनेनान्यान् । पातयामास भू
तले ॥ ३४ ॥ निपात्य प्रमथानीक ।

मध्यमवतसोसुरः। सिंहंहंतुंमहादेव्याः। कोपंचक्रेततोंबि
का।२५। सोपिकोपान्महावीर्यः। खुरक्षुण्णमहीतलः। शृंगाभ्यां
पर्वतानुच्चैः। चिक्षेपचननादच।२६। वेगभ्रमणविक्षुण्णा। महीत
स्यव्यशीर्यत। लांगूलेनाहतश्चाब्धिः। प्लावयामाससर्वतः।२७।
धुतशृंगविभिन्नाश्च। खंडंखंडंययुर्घनाः। श्वासानिलाहताःश
णी। निपेतुर्नभसोऽचलाः।२८। इतिक्रोधसमाध्मात। मापतंतम
हासुरं। दृष्ट्वासाचंडिकाकोपं। तद्वधायतदाकरोत्।२९। साक्षि
प्तातस्यविपाशं। तंबबंधमहासुरं। तत्याजमाहिषंरूपं। सोपिबद्धो
महामृधे।३०। ततःसिंहोभवत्सद्यो। यावत्तस्यांबिकाशिरः। छि

२०

न्नत्तितावत्पुरुषः। खड्गपाणिरदृश्यत।३१। ततएवाशुपुरुषं। दे
वीचिच्छेदसायकैः। तंखड्गचर्मणासार्द्धं। ततःसोभून्महागजः।
।३२। करेणचमहासिंहं। तंचकर्षजगर्जच। कर्षतस्तुकरंदेवी
खड्गेननिरकृंतत।३३। ततोमहासुरोभूयो। माहिषंवपुरास्थि
तः। तथैवक्षोभयामास। त्रैलोक्यंसचराचरं।३४। ततःक्रुद्धाजग
न्माता। चंडिकापानमुत्तमं। पपौपुनःपुनश्चैव। जहासारुणलोच
ना।३५। ननर्दचासुरःसोपि। बलवीर्यमदोद्धतः। विषाणाभ्यांचचि
क्षेप। चंडिकांप्रतिभूधरान्।३६। साचतान्प्रहितांस्तेन। चूर्ण
यंतीशरोत्करैः। उवाचतंमदोद्धूत। मुखरागाकुलाक्षरं।३७।

देव्युवाच ॥ गर्ज्ज गर्ज्ज क्षणं मूढ मधु यावत्पिबाम्यहं । मया त्वयि
हतेत्रैव गर्ज्जिष्यंत्याशु देवताः । ३८ ॥ ऋषिरुवाच ॥ एवमुक्त्वा
समुत्पत्य सारूढा तं महासुरं । पादेनाक्रम्य कंठे च शूलेनैनम-
ताडयत् ३९ । ततः सोपि पदाक्रांत स्तया निजमुखात्ततः । अ-
र्द्धनिःक्रांत एवासी द्देव्या वीर्येण संवृतः । ४० । अर्द्धनिःक्रांत एवा-
सौ । युध्यमानो महासुरः तया महासिना देव्या । शिरश्छित्वा नि-
पातितः । ४१ एवं स महिषो नाम । ससैन्यः ससुहृद्गणः । त्रैलोक्यं मो-
हयित्वा तु । तया देव्या विनाशितः ॥ ४२ । त्रैलोक्यस्थैस्तदा भूतै र्म-
हिषे विनिपातिते । जयेत्युक्तं तदा सर्वैः । सदेवासुरमानवैः ४३ ३७

ततो हाहाकृतं सर्वं
दैत्यसैन्यं ननाशत
त् । प्रहर्षं च परं जग्मु
ः सकला देवताग
णाः ४४ तुष्टुवुस्तां
सुरा देवीं सह दिव्यै
र्महर्षिभिः । जगुर्
गंधर्वपतयो ननृ
तुश्चाप्सरोगणाः ॥ ४५

॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये म
हिषासुरवधः॥ ३॥ ॥ ऋषिरुवाच॥ ततः सुरगणाः सर्वे। देव्या
इंद्रपुरोगमाः। स्तुतिमारेभिरे कर्तुं। निहते महिषासुरे॥ १॥ शक्रा
दयः सुरगणा निहतेतिवीर्ये। तस्मिन्दुरात्मनि सुरारिबले च
देव्या। तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा। वाग्भिः प्रहर्षपुलको
द्गमचारुदेहाः॥ २॥ देवा ऊचुः॥ देव्या यया ततमिदं जगदात्मश
क्त्या। निःशेषदेवगणशक्तिसमूहमूर्त्या। तामंबिकामखिलदेव
महर्षिपूज्यां। भक्त्या नताः स्म विदधातु शुभानि सा नः॥ ३॥ यस्याः प्र
भावमतुलं भगवाननंतो। ब्रह्मा हरश्च न हि वक्तुमलं बलं च। सा चंडि

३५

काखिलजगत्परिपालनाय। नाशाय चाशुभभयस्य मतिं करो
तु॥ ४॥ या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः। पापात्मनां कृत
धियां हृदयेषु बुद्धिः। श्रद्धा सतां कुलजनप्रभवस्य लज्जा। तां त्वां
नताः स्म परिपालय देवि विश्वं॥ ५॥ किं वर्णयाम तव रूपमचिंत्य
मेतत्। किं चातिवीर्यमसुरक्षयकारि भूरि। किं चाहवेषु चरि
तानि तवाद्भुतानि। सर्वेषु देव्यसुरदेवगणादिकेषु॥ ६॥ हेतुः
समस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपा
रा। सर्वाश्रयाखिलमिदं जगदंशभूतम्। अव्याकृता हि परमा प्रकृ
तिस्त्वमाद्या॥ ७॥ यस्याः समस्तसुरता समुदीरणेन। तृप्तिं प्रया

तिसकलेषुमखेषुदेवि। स्वाहासिवैपितृगणस्यचतृप्तिहेतु
। रुच्चार्यसेत्वमतएवजनैःस्वधाच॥८॥ यामुक्तिहेतुरविचिं
त्यमहाव्रताच। मभ्यस्यसेसुनियतेंद्रियतत्वसारैः। मोक्षा
र्थिभिर्मुनिभिरस्तसमस्तदोषै। र्विद्यासिसाभगवती। प
रमाहिदेवी॥९॥ शब्दात्मिकासुविमलर्ग्यजुषांनिधान
मुद्गीथरम्यपदपाठवतांचसाम्नां। देवीत्रयीभगवतीभव।
भावनाय। वार्त्ताचसर्वजगतांपरमार्त्तिहंत्री॥१०॥ मेधासि
देवीविदिताखिलशास्त्रसारा। दुर्गासिदुर्गभवसागरनौर
संगा। श्रीःकैटभारिहृदयैककृताधिवासा। गौरीत्वमेवश

शिमौलिकृतप्रतिष्ठा॥११॥ ईषत्सहासममलंपरिपूर्णचं
द्रबिंबानुकारिकनकोत्तमकांतिकांतं। अत्यद्भुतंप्रहृतमात्त
रुषातथापिवक्त्रं। विलोक्यसहसामहिषासुरेण॥१२॥ दृष्ट्वातदे
विकुपितंभ्रुकुटीकरालं। मुद्यच्छशांकसदृशछवियन्नसद्यः
प्राणान्मुमोचमहिषस्तदतीवचित्रं। कैर्जीव्यतेहिकुपितांत
कदर्शनेन॥१३॥ देवीप्रसीदपरमाभवतीभवाय। सद्योविना
शयसिकोपवतीकुलानि। विज्ञातमेतदधुनैवयदस्तमेतं। नी
तंबलंसुविपुलंमहिषासुरस्य॥१४॥ तेसम्मताजनपदेषुधना
नितेषां। तेषांयशांसिनचसीदतिबंधुवर्गः। धन्यास्तएवनिभृता

त्मजन्मृत्यदारा। यथासदास्तुदयदा लवतीभसत्वा।२५। धर्म्मा
णिदेविसकलानिसदैवकर्म्मा। एयंत्याहृताःप्रतिदिनंसुकृ
ताकरोति स्वर्यभयातिवततोनवताभसादा। छाकशत्यपिफ
लदानभ्रादवितन।२६। ऊर्ध्वस्मृतादरसिनीतिमङ्गाणजंबाः।
त्वस्वैःस्मृतामतिमतीवश्वतांददासि। दारिद्र्यदुःखनयक्षारि
णिकाच्यदन्या। सर्व्वोपिकारकरणायसदाईविद्या।२७। एदि
द्वीतिरुरगडाणेतुसुरंवताधात। कर्व्वैवनावनरकायविरायणा
यं सेयामसृत्सुमाधिमम्याद्विवधयात। सर्व्वेतिहृनमद्विताउवि
विद्वंसिदेवि।२८। हष्टेवकिंनलवतीधकरातिलस्मः सर्व्वो ३३

सुरानरिष्ठयस्यदिगोपिद्गास्वं। लोकानुपयांतरियवापिदि
ज्ञास्वहता। इत्थंमतिर्लवतिष्वादितेषसाध्वी।२९। खङ्गप्रत्नानि
करविस्फुरणेनसैथाये। शूलायकांतिनिवेदनहृप्ताःसुराण
यन्नागताविलयमस्तुमविंडखंड। योग्यानतंतवविलोकयंतो।
तदेततः।३०। ईडिह्येत्रिष्टत्रयामनंतवदेवशालं। रूपंतथैतदवि
चिंत्यमतुल्यमन्यैः। वीर्यंचिवंद्वहतदवयराक्रमाणां। खेरिप
रिपक्कदीतिवदयाह्यायवं।३१। कोनायमानवहतेस्ययराक्र
मस्य। रूपंवशात्ततयकार्यतिद्यारिक्वत। चित्रंक्रयासमरगि
ह्वरतावहृष्टा। वाव्यवदेविवरदेत्तुवनत्वयेपि।३२। त्रैलोक्य।

मेतदखिलंरक्षितंशासनेन। त्रातंत्वयासमरमूर्द्धनितेपिहत्वा। नीता
दिवंरिपुगणाभयमप्यपास्त। मस्माकमुन्मदसुरारिभवंनमस्ते।
२३। शूलेनपाहिनोदेवि। पाहिखड्गेनचांबिके। घंटास्वनेननःपा
हिचापज्यानिःस्वनेनच। २४। प्राच्यांरक्षप्रतीच्यांच। चंडिकेर
क्षदक्षिणे। भ्रामणेनात्मशूलस्य। उत्तरस्यांतथेश्वरि। २५। सौम्या
नियानिरूपाणि। त्रैलोक्येविचरंतिते। यानिचात्यंतघोराणि। तै
रक्षास्मांस्तथाभुवं। २६। खड्गशूलगदादीनि। यानिचास्त्राणितें
बिके। करपल्लवसंगीनि। तैरस्मान्रक्षसर्वतः। २७। ऋषिरु
वाच। एवंस्तुतासुरैर्दिव्यैः। कुसुमैर्नंदनोद्भवैः। अर्चिताजग ३४

तांधात्री। तथागंधानुलेपनैः। २८। भक्त्यासमस्तैस्त्रिदशैर्दिव्यैर्धूपै
स्तुधूपिता। प्राहप्रसादसुमुखी। समस्तान्प्रणतान्सुरान्। २९
॥श्रीदेव्युवाच॥ व्रियतांत्रिदशाःसर्वे। यदस्मत्तोभिवांछितं। द
दाम्यहमतिप्रीता। स्तवैरेभिःसुपूजिता। ३०। कर्तव्यमपरंयच्च।
दुष्करंतन्निवेद्यतां। इत्याकर्ण्यवचोदेव्याः। प्रत्यूचुस्तेदिवौकस
॥३१॥ देवाऊचुः॥ भगवत्याकृतंसर्वं। नकिंचिदवशिष्यते। यद
यंनिहतःशत्रु। रस्माकंमहिषासुरः। ३२। यदिचापिवरोदेय।
स्त्वयास्माकंमहेश्वरि। संस्मृतासंस्मृतात्वंनो। हिंसेथाःपरमा
पदः। ३३। यश्चमर्त्यःस्तवैरेभि। स्त्वांस्तोष्यत्यमलानने। तस्यवि

ऋषिभिर्विलसैर्देवैर्नदाशादिसंपदा ॥ ३४ ॥ इत्युक्त्वास्मत्प्रसन्नात्वं त्वे
थ्याः सर्वदांबिके ॥ ऋषिरुवाच ॥ इति प्रसादिता देवैर्जगतो
र्थे तथात्मनः तथेत्युक्त्वा भद्रकाली बभूवांतर्हिता नृप ॥ ३५ ॥ इत्ये
तत्कथितं नृप संभूता सा यथा पुरा देवी देवशरीरेभ्यो जगत्
त्रयहितैषिणी ॥ ३६ ॥ पुनश्च गौरीदेहात्सा समुद्भूता यथाभव
त् वधाय दुष्टदैत्यानां तथा शुंभनिशुंभयोः ॥ ३७ ॥ रक्षणाय च
लोकानां देवानामुपकारिणी तच्छृणुष्व मयाख्यातं यथाव
त्कथयामि ते ॥ ३८ ॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंत
रे देवीमाहात्म्ये शक्रादिस्तुतिः ॥ ऋषिरुवाच ॥ [illegible] ३५

रस्कंताशात्यदेवीस्तवरितस्मात् ऋषिरिति [illegible] ॥ पुरा शुंभनि
शुंभाय वसुरौ घोरदर्शिनौ ॥ तौ प्राप्तयावनावेव त्वरतुस्तत्र
मं ॥ २ ॥ वर्षाणामयुतं यावत् दिव्यं विस्मापयन् घटं निराहारौ महा
राज ध्यक्तरलोकपावने ॥ ३ ॥ ततः प्रसन्नो भगवान् ब्रह्मा लोक
पितामहः दत्तवान्सुरङ्गान्याः सोराज्यं भुवनत्रये ॥ ४ ॥ ततः
शुंभनिशुंभाभ्यामसुराभ्यां शचीपतेः त्रैलोक्यं यज्ञभागाश्च
हृता मदबलाश्रयात् ॥ ५ ॥ तावेव सूर्यतां तद्वदधिकारं तथै
दवं कौबेरमथ याम्यं च चक्राते वरुणस्य च ॥ ६ ॥ तावेव पवनर्
द्धिं च चक्रतुर्वह्निकर्म्म च अन्येषां तावयद्दोषा मधिकारान्

दिवौकसां । ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः ॥ ६ ॥ इं
द्राद्यास्त्याजिताः स्वर्गा भ्रष्टराज्याः पराजिताः । तेषु तेष्वधिकारेषु लो
कपंचमहीपते ॥ ७ ॥ स्थानेष्वथ स्थिता ह्यादित्या च । नक्षत्रग्रहनियोज
मत । त[illegible]ऽसद्दंडेन । बिभ्राणा मानुषीं तनुं ॥ ८ ॥ विचेरुरवनौ
राजन् कृत्वा धर्मनिसंततौ । एवं तु वसतां तत्र देवतानां सिताऽ
सिं ॥ ९ ॥ गतमासीन्महाराज चत्वारिंशाष्टवर्षणं । ततो देवाः सांद्र
डेन ब्रह्मणा च समागताः ॥ १० ॥ कृताधिकारास्त्रिदशाः स्थानात्
सर्वे निराकृताः । महासुरास्त्वां तां देवीं स्मरंति तत्र पराजिताः ॥ ११ ॥
तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः । भवतां नाशयिष्या ३६

मि । तत्क्षणात्परमापदः ॥ १२ ॥ इति कृत्वा मतिं देवा हिमवंतं नगे
श्वरं । जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः ॥ १३ ॥ [illegible]
॥ नमो देव्यै महादेव्यै शिवायै सततं नमः । न[illegible]
यै नियताः प्रणताः स्मतां ॥ १४ ॥ रौद्रायै नमो नित्यायै
गौर्यै धात्र्यै नमो नमः । ज्योत्स्नायै चेंदुरूपिण्यै सुखायै सततं
नमः ॥ १५ ॥ कल्याण्यै प्रणता वृद्ध्यै सिद्ध्यै कूर्म्यै नमो नमः । नैर्ऋत्यै
भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥ १६ ॥ दुर्गायै दुर्गपारायै
सारायै सर्वकारिण्यै । ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः
॥ १७ ॥ अतिसौम्यातिरौद्रायै नमस्तस्यै नमो नमः । नमो जगत्प्र

तिष्ठायै। देव्यैकृत्यैनमोनमः।२८। यादेवीसर्वभूतेषु। विष्णु
मायेतिशब्दिता। नमस्तस्यैनमस्तस्यै। नमस्तस्यैनमोन
मः।२९। यादेवीसर्वभूतेषु। चेतनेत्यभिधीयते। नम
स्तस्यैनमस्तस्यै। नमस्तस्यैनमोनमः।३०। यादेवीसर्वभू
तेषु। बुद्धिरूपेणसंस्थिता। नमस्तस्यैनमस्तस्यै। नमस्त॰
स्यैनमोनमः।३१। यादेवीसर्वभूतेषु। निद्रारूपेणसं॰
स्थिता। नमस्तस्यै३। नमोनमः।३२। यादेवीसर्वभूतेषु।
क्षुधारूपेणसंस्थिता। नमस्तस्यै। नमस्तस्यैनमोनमः।३३।
यादेवीसर्वभूतेषु। छायारूपेणसंस्थिता। नमस्तस्यै। नमः। ३७

स्तस्यैनमोनमः।३४। यादेवीसर्वभूतेषु। शक्तिरूपेणसंस्थि
ता। नमस्तस्यै३। नमस्तस्यै०।३५। यादेवीसर्वभूतेषु। तृष्णा
रूपेणसंस्थिता। नमस्तस्यै३। नमस्तस्यै०।३६। यादेवीसर्व
भूतेषु। क्षान्तिरूपेणसंस्थिता। नमस्तस्यै३। नमस्तस्यै०।
३७। यादेवीसर्वभूतेषु। जातिरूपेणसंस्थिता। नमस्तस्यै
३। नमस्तस्यैनमोनमः।३८। यादेवीसर्वभूतेषु। लज्जारूपे
णसंस्थिता। नमस्तु३। नमस्तु०।३९। यादेवीसर्वभूतेषु। शां
तिरूपेणसंस्थिता। नमस्तु३।४०। यादेवीसर्वभूतेषु। श्र
द्धारूपेणसंस्थिता। नमस्तस्यै३। नमस्तु०।४१। यादेवीसर्वभू

ते[illegible] कांतिरूपेणसंस्थिता। नमस्तस्यै३। नमस्तस्यै। ३२। यादेवी
सर्वभूतेषु। लक्ष्मीरूपेणसंस्थिता। नमस्तस्यै३। नमस्तस्यै। ३।
३। यादेवीसर्वभूतेषु। धृतिरूपेणसंस्थिता। नमस्तस्यै नमस्त
स्यै। ३४। यादेवीसर्वभूतेषु। वृत्तिरूपेणसंस्थिता। नमस्तस्यै३
नमस्तस्यै। ३५। यादेवीसर्वभूतेषु। स्मृतिरूपेणसंस्थिता।
नमस्तस्यै३। नमस्तस्यै। ३६। यादेवीसर्वभूतेषु। दयारूपे
णसंस्थिता। नमस्तस्यै३। नमस्तस्यै। ३७। यादेवीसर्वभूतेषु
नीतिरूपेणसंस्थिता। नमस्तस्यै३। नमस्तस्यै। ३८। यादेवी
सर्वभूतेषुतुष्टिरूपेणसंस्थिता। नमस्तस्यै३। नमस्तस्यै। ३९। ३५

यादेवीसर्वभूतेषु। पुष्टिरूपेणसंस्थिता। नमस्तस्यै। नमस्त[illegible]
४०। यादेवीसर्वभूतेषु। मातृरूपेणसंस्थिता। नमस्तस्यै३। नम
[illegible]॥ ४१॥ यादेवीसर्वभूतेषु। भ्रांतिरूपेणसंस्थिता। नमस्तस्यै।
नमो नमः। ४२॥ इंद्रियाणामधिष्ठात्री। भूतानामखिलेषुया। [illegible]
भूसततंतस्यै। व्याप्तिदेव्यैनमोनमः॥ ४३॥ चितिरूपेणयाकृत्स्न
मेतद्व्याप्यस्थिताजगत्। नमस्तस्यै३॥ नमस्तस्यै॥ ४४। स्तुतासु
रैःपूर्वमभीष्टसंश्रया। तथासुरेंद्रेणदिनेषुसेविता। करो
तुसानःशुभहेतुरीश्वरी। शुभानिभद्राण्यभिहंतुचापदः॥ ४५॥
यासांप्रतंचोद्धतदैत्यतापितै। रस्माभिरीशाचसुरैर्नमस्यते

याचस्मृतातत्क्षणमेवदेवैस्त्रिभिः सिंहस्थायद्वालक्षिविनसमृत्रिभिः॥
४६ ॥ इत्यौकुमारी ॥ एवंस्त्रीबालिद्युत्कारी देवानांतत्रपार्वती स्व
स्तुमत्स्यायद्याताय । अक्रव्यान्नृपनंदन ॥ ४७ ॥ साःब्रवीत्तान्
सुरान्सुस्व । देवद्भिःस्तूयतेऽत्रका । शारीरकोशातश्चास्याः समु
द्भूताऽब्रवीच्छिवा ॥ ४८ ॥ स्तोत्रंममैतत्क्रियते शुंभदैत्यनिराकृ
तैः । देवैःसमस्तैःसमरे निशुंभेनपराजितैः ॥ ४९ ॥ शारी
रकोशाद्यात्तस्याः पार्वत्यानिःसृताम्बिका । कौशिकीतिसमस्ते
षुततोलोकेषुगीयते ॥ ५० ॥ तस्यांविनिर्गतायांतु कृष्णाऽभूत्सा
पिपार्वती । कालिकेतिसमाख्याता हिमाचलकृताश्रया ॥ ५१ ॥

३५

ततोऽम्बिकांपरंरूपं बिभ्राणांसुमनोहरं । ददर्शचंडोमुंडश्च भृ
त्यौशुंभनिशुंभयोः ॥ ५२ ॥ ताभ्यांशुंभायचाख्याता साऽतीवसुस
नोहरा । काप्यास्तेस्त्रीमहाराज भासयंतीहिमाचलं ॥ ५३ ॥ नै
वतादृक्क्वचिद्रूपं दृष्टंकेनचिदुत्तमं । ज्ञायतांकाप्यसौदेवी
गृह्यतांचासुरेश्वर ॥ ५४ ॥ स्त्रीरत्नमतीचार्वंगी द्योतयंतीदिशस्त्वि
षा । सातुतिष्ठतिदैत्येंद्र तांभवान्द्रष्टुमर्हति ॥ ५५ ॥ यानिरत्नानि
मणयो गजाश्वादीनिवैप्रभो । त्रैलोक्येतुसमस्तानि सांप्रतंभां
तानितेगृहे ॥ ५६ ॥ ऐरावतःसमानीतो गजरत्नंपुरंदरात् । पारिजा
ततरुश्चायं तथैवोच्चैःश्रवाहयः ॥ ५७ ॥ विमानंहंससंयुक्तं

मेततिष्टतितेंगदे रत्नलतमिहानीतं यदासीद्वेधसोद्भुतं । एत
निधिरेषमहापद्मः समानीतोधनेश्वरात । किंजल्किंनिंददौ
चाब्धि मालामम्लानपंकजां । ९४ । छत्रंतेवारुणंगेहं । कांचनस्रा
वितिष्टति । तथायंस्यंदनवरो । यः पुरासीत्प्रजापतेः । ९५ ।
मृत्योरुत्क्रांतिदानाम शक्तिरीशत्वयाहृता । पाशः सलिलरा
जस्य । भ्रातुस्तवपरिग्रहे । ९६ । निशुंभस्याब्धिजाताश्च समस्ता
रत्नजातयः । वह्निश्चापिददौतुभ्य । मग्निशौचेचवाससी । ९७
एवंदैत्येंद्ररत्नानि । समस्तान्याहृतानिते । स्त्रीरत्नमेषाकल्या
णी । त्वयाकस्मान्नगृह्यते । ९८ । ऋषिरुवाच । निशम्यतिव ४०

चःशुंभः । सतदाचंडमुंड
योः । प्रेषयामाससुग्रीवं
दूतंदेव्यामहासुरं । ९९
इतिचेतिचवक्तव्या । सा
गत्वावचनान्मम । यथाच
भ्येतिसंप्रीत्या । तथाकार्यं
त्वयालघु । १०० । [illegible]
[illegible] । सतत्रगत्वायत्रा
स्ते । शैलोद्देशेतिशो ।

तेन। तां च देवीं ततः शु
त्वा। श्लक्ष्णं मधुरया गिरा
॥६६॥ [illegible] देवि
दैत्येश्वरः शुंभ। त्रैलो
क्ये परमेश्वरः। दूतोऽहं प्रे
षितस्तेन। त्वत्सकाशमि
हागतः॥६७॥ अव्याहत
ज्ञः सर्वासु। यः सदा दे
वयोनिषु। निर्जिताखि

४१

ल दैत्यारिः स यदाह शृणुष्व तत्॥६८॥ मम त्रैलोक्यमखिलं मम दे
वा वशानुगाः। यज्ञभागानहं सर्वा। नुपाश्नामि पृथक् पृथक्॥६
९॥ त्रैलोक्ये वररत्नानि। मम वश्यान्यशेषतः। तथैव गजरत्नं च
हृतं देवेंद्रवाहनं॥७०॥ क्षीरोदमथनोद्भूत। मश्वरत्नं ममामरैः
। उच्चैःश्रवससंज्ञं तत्। प्रणिपत्य समर्पितं॥७१॥ यानि चान्यानि
देवेषु गंधर्वेषूरगेषु च। रत्नभूतानि भूतानि। तानि मय्येव शोभ
ने॥७२॥ स्त्रीरत्नभूतां त्वां देवि। लोके मन्यामहे वयं। सा त्वमस्मानुप र
गच्छ। यतो रत्नभुजो वयं॥७३॥ मां वा ममानुजं वापि। निशुंभमुरुक र
विक्रमं। भज त्वं चंचलापांगी। रत्नभूतासि वै यतः॥७४॥ प

रमैश्वर्य्यमतुलं। प्राप्स्यसेमत्परिग्रहात्। एतद्बुद्ध्यासमालोच्य
मत्परिग्रहतांव्रज। ७५॥ ऋषिरुवाच॥ इत्युक्तासातदादेवी। गं
भीरांतःस्मिताजगौ। दुर्गाभगवतीभद्रा। ययेदंधार्य्यतेजगत्
७६॥ श्रीदेव्युवाच॥ सत्यमुक्तंत्वयानात्र। मिथ्याकिंचित्त्वयोदि
तं। त्रैलोक्याधिपतिःशुंभो। निशुंभश्चापितादृशः। ७७। किंत्वत्र
यत्प्रतिज्ञातं। मिथ्यातत्क्रियतेकथं। श्रूयतामल्पबुद्धित्वात्प्र
तिज्ञायाकृतापुरा। ७८। योमांजयतिसंग्रामे। योमेदर्पंव्य
पोहति। योमेप्रतिबलोलोके। समेभर्त्ता
भविष्यति। ७९। तदागच्छतुशुंभोत्र। निशुंभोवामहासुरः। मां

४२

जित्वाकिंविलंबेन। पाणिं
गृह्णातुमेलघु। ८०। दूत
उवाच॥ अवलिप्तासिमैवं
त्वं। देविब्रूहिममाग्रतः।
त्रैलोक्येकःपुमांस्तिष्ठे
दग्रेशुंभनिशुंभयोः। ८१
अन्येषामपिदैत्यानां। स
र्वेदेवानवैयुधि। तिष्ठंति
सम्मुखेदेवी। किंपुनः

स्त्रीत्वमेकिका ।६२। इंद्राद्याः सकला देवा । स्तस्थुर्येषां न संयुगे । शुं
भादीनां कथं तेषां । स्त्री प्रयास्यसि संमुखं ।६३। सा त्वं गच्छ मयैवो
क्ता । पार्श्वं शुंभनिशुंभयोः । केशाकर्षणनिर्धूत । गौरवा मा ग
मिष्यति ।६४। श्रीदेव्युवाच । एवमेतद्बली शुंभो । निशुंभश्चाति
वीर्यवान् । किं करोमि प्रतिज्ञा मे । यदनालोचिता पुरा ।६५।
स त्वं गच्छ मयैवोक्तं । यदेतत्सर्वमादृतः । तदाचक्ष्वासुरेंद्राय । स
च युक्तं करोतु यत् ।६६। इति श्रीमार्कंडेयपुराणे सावर्णि
के मन्वंतरे देवीमाहात्म्ये दूतसंवादः पंचमोध्यायः ॥५॥ इत्या
कर्ण्य वचो देव्याः । स दूतोमर्षपूरितः । समाचष्ट समागम्य दैत्य ४३

राजाय विस्तरात् ।१। तस्य दूतस्य तद्वाक्य । माकर्ण्यासुरराट् ततः
सक्रोधः प्राह दैत्याना । मधिपं धूम्रलोचनं ।२। हे धूम्रलोचनाशु त्वं
स्वसैन्यपरिवारितः । तामानय बलाद्दुष्टां । केशाकर्षणविह्वलां
।३। तत्परित्राणदः कश्चि । द्यदि वोत्तिष्ठतेपरः । स हंतव्योमरो वा
पि । यक्षो गंधर्व एव च ।४। ऋषिरुवाच । तेनाज्ञप्तस्ततः शीघ्रं । स
दैत्यो धूम्रलोचनः । वृतः षष्ट्या सहस्राणा । मसुराणां द्रुतं ययौ ।५।
स दृष्ट्वा तां ततो देवीं । तुहिनाचलसंस्थितां । जगादोच्चैः प्रयाहीति
मूलं शुंभनिशुंभयोः ।६। न चेत्प्रीत्याद्य भवती । मद्भर्तारमुपैष्य
ति । ततो बलान्नयाम्येष । केशाकर्षणविह्वलां ।७। श्रीदेव्युवाच

दैत्येश्वरेणप्रहितो बलवान्बलसंवृतः। बलान्नयसिमामेव
ततःकिंतेकरोम्यहं ॥ ८ ॥ ऋषिरुवाच ॥ इत्युक्तःसोभ्यधावत्ता
मसुरोधूम्रलोचनः। हुंकारेणैवतंभस्म। साचकारांबिकाततः
॥ ९ ॥ अथक्रुद्धंमहासैन्य। मसुराणांतथांबिका। ववर्षसायकै
स्तीक्ष्णै। स्तथाशक्तिपरश्वधैः॥ १० ॥ ततोधुतसटःकोपात्कृत्व
नादंसुभैरवं। पपातासुरसेनायां। सिंहोदेव्यास्ववाहनं ॥ ११ ॥
कांश्चित्करप्रहारेण। दैत्यानास्येनचापरान्। आक्रम्यचाधरे
णान्यान्। सजघानमहासुरान् ॥ १२ ॥ केषांचित्पाटयामास ।
नखैःकोष्ठानिकेसरी। तथातलप्रहारेण। शिरांसिकृतवान्

स्पृथक् ॥ १३ ॥ विछिन्नबा
हुशिरसः। कृतास्तेनत
थापरे। पपौचरुधिरंको
ष्ठा। दन्येषांधुतकेसरः॥ १
४ ॥ क्षणेनतद्बलंसर्वं क्ष
यंनीतंमहात्मना। तेनके
सरिणादेव्या। वाहनेना
तिकोपिना ॥ १५ ॥ श्रुत्वात
मसुरंदेव्या। निहतंधूम्र

लोचनं। बलंचक्षपितंकस्नं। देव्याकेसरिणाततः॥१६॥ चुकोप
दैत्याधिपतिः। शुंभःप्रस्फुरिताधरः। आज्ञापयामासचौतौ। चंड
मुं महासुरौ॥१७॥ हेचंडहेमुंडबलैर्बहुलैःपरिवारितौ।
गच्छंतत्रगत्वाच। सासमानीयतांलघु॥१८॥ केशेष्वाकृष्यबद्ध्वावा
यदिवःसंशयोयुधि। तदाशेषायुधैःसर्वैरसुरैर्विनिहन्यतां।
॥१९॥ तस्यांहतायांदुष्टायां। सिंहेचविनिपातिते। शीघ्रमागम्यतं
बद्ध्वा। गृहीत्वातामथांबिकां॥२०॥ इतिश्रीमार्कंडेयपुराणेसा
वर्णिकेमन्वंतरेदेवीमाहात्म्ये। शुंभनिशुंभसेनानीधूम्रलोचनव
धोनाम। षष्ठोध्यायः॥६॥ ऋषिरुवाच॥ आज्ञप्तास्तेततोदैत्याश्चं

४५

डमुंडपुरोगमाः। चतुरंगबलोपेता। ययुरभ्युद्यतायुधाः॥१॥ ददृशु
स्तेततोदेवी। मीषद्धासांव्यवस्थितां। सिंहस्योपरिशैलेंद्र। शृंगेम
हतिकांचने॥२॥ तेदृष्ट्वातांसमादातु। मुद्यमंचक्रुरुद्यमाः। आकृष्ट
चापासिधरा। स्तथान्येतत्समीपगाः॥३॥ ततःकोपंचकारोच्चैरंबि
कातानरीन्प्रति। कोपेनचास्यावदनं। मषीवर्णमभूत्तदा॥४॥ भृकु
टीकुटिलात्तस्या। ललाटफलकाद्रुतं। कालीकरालवदना। वि
निष्क्रांतासिपाशिनी॥५॥ विचित्रखट्वांगधरा। नरमालाविभूषणा
द्वीपिचर्मपरीधाना। शुष्कमांसातिभैरवी॥६॥ अतिविस्तारवद
ना। जिह्वाललनभीषणा। निमग्नारक्तनयना। नादापूरितदिङ्मु

रथा ७ सावेगेनाभिपतिता घातयंती महासुरान् सैन्ये तत्र सुरा
रीणां भक्षयंतत्तद्बलं ८ पार्ष्णिग्राहांकुशग्राह योधघंटासमन्वि
तान् समादायैकहस्तेन मुखे चिक्षेप वारणान् ९ तथैव योधं तु
रंगै रथं सारथिना सह निक्षिप्य वक्त्रे दशनैश्चर्वयंत्यतिभैरवं १
० एकं जग्राह केशेषु ग्रीवायामथ चापरं पादेनाक्रम्य चैवान्यमु मू
रा रसान्यमपोथयत ११ तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासु
रैः मुखेन जग्राह रुषा दशनैर्मथितान्यपि १२ बलिनां तद्बलं
सर्वमसुराणां दुरात्मनां ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्त
था १३ असिना निहताः केचित् केचित्खट्वांगताडिताः जग्मु ४६

र्विनाशमसुरा दंताग्राभिहतास्तथा १४ क्षणेन तन्महासैन्यमसुरा
णां निपातितं दृष्ट्वा चंडोऽभिदुद्राव तां कालीमतिभीषणां १५ शरवर्
षैर्महाभीमैर्भीमाक्षीं तां महासुरः छादयामास चक्रैश्च मुंडः क्षिप्तैः
सहस्रशः १६ तानि चक्राण्यनेकानि विशमानानि तन्मुखं बभुर्य
थार्कबिंबानि सुबहूनि घनोदरं १७ ततो जहासातिरुषा भीमं भैर
वनादिनी काली करालवक्त्रांतर्दुर्दर्शदशनोज्ज्वला १८ उत्थाय च
महासिंहं सा देवी चंडमधावत गृहीत्वा चास्य केशेषु शिरस्तेना
सिनाच्छिनत् १९ छिन्ने शिरसि दैत्येंद्रश्चक्रे नादं सुभैरवं तेन ना
देन महता त्रासितं भुवनत्रयं २० अथ मुंडोऽभ्यधावत्तां दृष्ट्वा चंडं

निपातीतं तमायायातमथ्सूमो खड्गामालिरहतंरुषा ।२१। हतशेषंत
तःसैन्यं दृष्ट्वाचंडनिपातितं मुंडश्चसुमहावीर्यं दिशोभेजेभयातु
रं ।२२। शिरश्चंडस्यकालीच गृहीत्वामुंडमेवच प्राहप्रचंडाट्टहा
समिश्रमभ्येत्यचंडिकां ।२३। [illegible] मयातवात्रोपहृतौ चं
डमुंडौमहापशू युद्धयज्ञेस्वयंशुंभं निशुंभंचहनिष्यसि ।२४॥ [illegible]
[illegible] तवानीतौततोदृष्ट्वा चंडमुंडौमहासुरौ उवाचका
लीकल्याणी ललितंचंडिकावचं ॥२५॥ यस्माचंडंचमुंडंच गृहीत्व
त्वमुपागतौ चामुंडेतिततोलोके ख्यातादेवीभविष्यसि ।२६॥ [illegible]
[illegible]

४७

[illegible]
[illegible] ॥७॥ ॥ऋ
षिरुवाच ॥ चंडेचनि
हतेदैत्ये मुंडेचवि
निपातिते बहुलेषु
चसैन्येषु क्षयितेष्व
सुरेश्वरः ।१। ततःको
पपराधीन चेताःशुं
भःप्रतापवान् उद्यो

गंसर्वसैन्यानां । दैत्यानामादिदेशह ॥ २ ॥ अद्यसर्वबलैर्दैत्याः । षड
शीतिरुदायुधाः । कंबूनांचतुरशीतिः । निर्यांतुस्वबलैर्वृताः ॥ ३ ॥ को
टिवीर्याणिपंचाशत् । असुराणांकुलानिवै । शतंकुलानिधौम्राणां
निर्गच्छंतुममाज्ञया ॥ ४ ॥ कालकादौर्हृदामौर्याः । कालकेयास्त
थासुराः । युद्धायसज्जानिर्यांतु । आज्ञयात्वरितामम ॥ ५ ॥ इत्याज्ञा
प्यासुरपतिः । शुंभोभैरवशासनः । निर्जगाममहासैन्य । सहस्रैर्ब
हुभिर्वृतः ॥ ६ ॥ आयांतंचंडिकादृष्ट्वा । तत्सैन्यमतिभीषणं । ज्या
स्वनैःपूरयामास । धरणीगगनांतरं ॥ ७ ॥ ततःसिंहोमहानादम
तीवकृतवान्नृप । घंटास्वनेनतन्नादं । अंबिकाचोपबृंहयत् ॥ ८ ॥ ४८

धनुर्ज्यासिंहघंटानां । नादापूरितदिङ्मुखा । निनादैर्भीषणैःकाली
जिग्येविस्तारितानना ॥ ९ ॥ तंनिनादमुपश्रुत्य । दैत्यसैन्यैश्चतुर्दिशं ।
देवीसिंहस्तथाकाली । सरोषैःपरिवारिताः ॥ १० ॥ एतस्मिन्नंतरेभू
प । विनाशायसुरद्विषां । भवायामरसिंहानां । अतिवीर्यबलान्वि
ताः ॥ ११ ॥ ब्रह्मेशगुहविष्णूनां । तथेंद्रस्यचशक्तयः । शरीरेभ्योविनि
ःक्रम्य । तद्रूपैश्चंडिकांययुः ॥ १२ ॥ यस्यदेवस्ययद्रूपं । यथाभूष
णवाहनं । तद्वदेवहितच्छक्तिः । असुरान्योद्धुमाययौ ॥ १३ ॥ हंसयु
क्तविमानस्था । साक्षसूत्रकमंडलुः । आयाताब्रह्मणःशक्तिः । ब्र
ह्माणीसाभिधीयते ॥ १४ ॥ माहेश्वरीवृषारूढा । त्रिशूलवरधारिणी

महाहिवलया प्राप्ता चंद्ररेखाविभूषणा ॥१६॥ कौमारी शक्तिह-
स्ता च मयूरवरवाहना । योद्धुमभ्याययौ दैत्यान् अंबिका गुहरू-
पिणी ॥१७॥ तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता । शंखचक्र-
४२७४ गदाशार्ङ्ग खड्गहस्ताभ्युपाययौ । यज्ञवाराहमतुलं रूपं या बि-
भ्रतो हरेः । शक्तिः साप्याययौ तत्र वाराही बिभ्रती तनुं ॥१८॥ ना-
रसिंही नृसिंहस्य बिभ्रती सदृशं वपुः । प्राप्ता तत्र सटाक्षेप क्षिप्त-
नक्षत्रसंहतिः ॥१९॥ वज्रहस्ता तथैवैंद्री गजराजोपरि स्थिता । प्रा-
प्ता सहस्रनयना यथा शक्रस्तथैव सा ॥२०॥ ततः परिवृतस्ताभि-
रीशानो देवशक्तिभिः । हन्यंतामसुराः शीघ्रं मम प्रीत्याह चं-

४५

डिकां ॥२१॥ ततो देवीशरीरात्तु विनिःक्रांतातिभीषणा । चंडिकाश-
क्तिरत्युग्रा शिवाशतनिनादिनी ॥२२॥ सा चाह धूम्रजटिलमीशा-
नमपराजिता । दूत त्वं गच्छ भगवन् पार्श्वं शुंभनिशुंभयोः ॥२३॥ ब्रूहि शु-
ंभं निशुंभं च दानवावतिगर्वितौ । ये चान्ये दानवास्तत्र युद्धाय
समुपस्थिताः ॥२४॥ त्रैलोक्यमिंद्रो लभतां देवाः संतु हविर्भुजः । यू-
यं प्रयात पातालं यदि जीवितुमिच्छथ ॥२५॥ बलावलेपादथ चे-
द्भवंतो युद्धकांक्षिणः । तदागच्छत तृप्यंतु मच्छिवाः पिशितेन वः ॥२-
६॥ यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयं । शिवदूतीति लोके

स्मिं स्ततः सा
ख्यातीमागता।
२७ तेपिश्रुत्वाव
चोदेव्याः शर्वा
ख्यातंमहासुरा
: अमर्षापूरिता
जग्मुर्यत्रकात्या
यनीस्थिता २८
ततःप्रथममेवाग्र ५७

शरशक्तिष्टिवृष्टिभिः ववर्षुरुद्धतामर्षा स्तांदेवीममरारयः २९
साचतान्प्रहितान्बाणान् शूलशक्तिपरश्वधान् चिच्छेदलीलया।
ध्मातधनुर्मुक्तैर्महेषुभिः ३० तस्याग्रतस्तथाकाली शूल
पातविदारितान् खट्वांगपोथितांश्चारीन् कुर्वतीव्यचरत्तदा ३१
कमंडलुजलाक्षेपहतवीर्यान्हतौजसः ब्रह्माणीचाकरोच्छ
त्रून् येनयेनस्मधावति ३२ माहेश्वरीत्रिशूलेन तथाचक्रेण।
वैष्णवी दैत्यान्जघानकौमारी तथाशक्त्यातिकोपना ३३ ऐंद्री
कुलिशपातेन शतशोदैत्यदानवाः पेतुर्विदारिताः पृथ्व्यां रु
धिरौघप्रवर्षिणः ३४ तुंडप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः ।

वाराहमूर्त्यान्यपतं श्चक्रेणचविदारिताः ३५ नखैर्विदारितांश्चा
न्यान् भक्षयंती महासुरान् नारसिंहीचचाराजौ नादापूरि
तदिग्मुखा ३६ चंडाट्टहासैरसुराः शिवदूत्याभिदूषिताः प
तुः पृथिव्यां पतितांस्तांश्चखादाथसातदा ३७ इति मातृगणं
क्रुद्धं मर्दयंतं महासुरान् दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारि
सैनिकाः ३८ पलायनपरान् दृष्ट्वा दैत्यान् मातृगणार्दितान्
योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ३९ रक्तबिंदुर्य
दा भूमौ पतत्यस्य शरीरतः समुत्पतति मेदिन्यां तत्प्रमाणस्त
महासुरः ४० युयुधे स गदापाणिरिंद्रशक्त्या महासुरः तत ५१

श्चैंद्री स्ववज्रेण र
क्तबीजमताडयत्
त ४१ कुलिशेना
हतस्यास्य बहु
सुस्राव शोणितं
समुत्तस्थुस्ततो यो
धा स्तद्रूपास्तत्प
राक्रमाः ४२ या
वंतः पतितास्तस्य

शरीराद्रक्तबिंदवः । तावंतः पुरुषा जाता । स्तद्वीर्यबलविक्रमाः ॥ ४
३ ॥ तेचापियुयुधुस्तत्र । पुरुषा रक्तसंभवाः । समंमातृभिरत्युग्रं श
स्त्रपातातिभीषणं ॥ ४४ ॥ पुनश्च वज्रपातेन । क्षतमस्य शिरो यदा
ववाह रक्तं पुरुषा । स्ततो जाताः सहस्रशः ॥ ४५ ॥ वैष्णवी समरे
चैनं । चक्रेणाभिजघान ह । गदया ताडयामास । ऐंद्री तमसुरेश्वरं ॥
४६ ॥ वैष्णवी चक्रभिन्नस्य । रुधिरस्रावसंभवैः । सहस्रशो जगद्व्या
प्तं तत्प्रमाणैर्महासुरैः ॥ ४७ ॥ शक्त्या जघान कौमारी । वाराही
च तथासिना । माहेश्वरी त्रिशूलेन । रक्तबीजं महासुरं ॥ ४८ ॥ स चापि
गदया दैत्यः । सर्वा एवाहनत्पृथक् । मातॄः कोपसमाविष्टो रक्त ५२

याता महासुरा ॥५८॥ तांश्च खादाथ चामुंडा पपौ तस्य च शोणितं ।
देवी शूलेन चक्रेण बाणैरसिभिरिष्टिभिः ॥५९॥ जघान रक्तबीजं
तं चामुंडापीतशोणितं । स पपात महीपृष्ठे शास्त्रसंघसमाहतः ॥
६० ॥ नीरक्तश्च महीपाल रक्तबीजो महासुरः । ततस्ते हर्षमतुलं
मवापुस्त्रिदशा नृप ॥६१॥ तेषां मातृगणो मत्तो ननर्तासृग्मदोद्धत
॥६२॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये
रक्तबीजवधः ॥ ८ ॥ ॥राजोवाच॥ विचित्रमिदमाख्यातं भगवन् भ
वता मम । देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितं ॥१॥ भूयश्चे
च्छाम्यहं श्रोतुं रक्तबीजे निपातिते । चकार शुंभो यत्कर्म निशुंभ

श्चातिकोपनः ॥ २ ॥ ऋषिरुवाच ॥ चकारकोपमतुलं रक्तबीजनि
पातिते । शुंभासुरोनिशुंभश्च । हतेष्वन्येषुचाहवे ॥ ३ ॥ हन्यमानंम
हासैन्यं । विलोक्यामर्षमुद्वहन् । अभ्यधावन्निशुंभोथ । मुख्ययासु
रसेनया ॥ ४ ॥ तस्याग्रतस्तथा पृष्टे । पार्श्वयोश्चमहासुराः । संदष्टो
ष्टपुटाःक्रुद्धा । हंतुंदेवीमुपाययुः ॥ ५ ॥ आजगाममहावीर्यः । शुं
भोपिस्वबलैर्वृतः । निहंतुंचंडिकांकोपात् । कृत्वायुद्धंतुमातृभि
ः ॥ ६ ॥ ततोयुद्धमतीवासीत् । देव्याःशुंभनिशुंभयोः । शरवर्षमतीवो
ग्रं मेघयोरिववर्षतोः ॥ ७ ॥ चिच्छेदतांछरांस्ताभ्यां चंडिकास्वश
रोत्करैः । ताडयामासचांगेषु शस्त्रौघैरसुरेश्वरौ । ताडयामास ५४

वांगेषु । निशुंभो निशितं खड्गं । चर्म्म चादाय सुप्रभं । अताडयन्मू
र्ध्नि सिंहं । देव्या वाहनमुत्तमं ।९। ताडिते वाहने देवी । क्षुरप्रेणा
सिमुत्तमं । निशुंभस्याशु चिछेद चर्म्म चाप्यष्टचंद्रकं ।१०। छिन्ने
चर्म्मणि खड्गे च । शक्तिं चिक्षेप सोसुरः । तामप्यस्य द्विधा चक्रे ।
चक्रेणाभिमुखागतां ।११। कोपाध्मातो निशुंभोथ । शूलं जग्राह
दानवः । आयांतं मुष्टिपातेन । देवी तच्चाप्यचूर्णयत् ।१२। आविध्याथ गदां सोपि । चिक्षेप चंडिकां प्रति । सापि देव्या त्रिशूलेन । भिन्ना
भस्मत्वमागता ।१३। ततः परशुहस्तं तं । आयांतं दैत्यपुंगवं । आ
हत्य देवी बाणौघै । रपातयत भूतले ।१४। तस्मिन्निपतिते भू ५५

मौ निशुंभे भीमविक्रमे । भ्रातर्यतीव संक्रुद्धः । प्रययौ हंतुमंबिकां
।१५। स रथस्थस्तदात्युच्चै । र्गृहीतपरमायुधैः । भुजैरष्टाभिरतुलै ।
र्व्याप्याशेषं बभौ नभः ।१६। तमायांतं समालोक्य । देवी शंखमवाद
यत् । ज्याशब्दं चापि धनुष । श्चकारातीव दुःसहं ।१७। पूरयामा
स ककुभो । निजघंटास्वनेन च । समस्तदैत्यसैन्यानां । तेजोवधवि
धायिना ।१८। ततः सिंहो महानादै । स्त्याजितेभमहामदैः । पूरया
मास गगनं । गां तथैव दिशो दश ।१९। ततः काली समुत्पत्य । गग
नं क्ष्मामताडयत् । कराभ्यां तन्निनादेन । प्राक्स्वनास्ते तिरोहि
ताः ।२०। अट्टाट्टहासमशिवं । शिवदूती चकार ह । तैः शब्दैरसुरा

रास्वैखः। शुंभः को
पपरं ययौ ॥ २१ ॥ दुरा
त्मंस्तिष्ठ तिष्ठेति
व्याजहारांबिकाय
दा। तदाजयेत्यभि
हीतं देवैराकाश
संस्थितैः ॥ २२ ॥ शुंभे
नेत्यागत्य याशक्ति
र्मुक्ताज्वालातिभी ५६

षणा। आयांती वह्निकूटाभा सा निरस्ता महोल्कया ॥ २३ ॥ सिंह
नादेन शुंभस्य। व्याप्तं लोकत्रयांतरं। निर्घातनिस्वनो घोरो। जित
वानवनीपते ॥ २४ ॥ शुंभमुक्तान्छरान्देवी ॥ शुंभस्तत्प्रहिता
न्छरान्। चिच्छेद स्वशरैरुग्रैः। शतशोथ सहस्रशः ॥ २५ ॥ त
तः सा चंडिका क्रुद्धा। शूलेनाभिजघान तं। स तदाभिहतो भू
मौ मूर्छितो निपपात ह। ततो निशुंभः संप्राप्य। चेतनामात्तकार्मु
कः। आजघान शरैर्देवीं कालीं केसरिणं तथा ॥ २६ ॥ पुनश्च
कृत्वा बाहूनामयुतं दनुजेश्वरः ॥ चक्रायुधेन दितिजश्छा
दयामास चंडिकां ॥ २७ ॥ ततो भगवती क्रुद्धा ॥ दुर्गा दुर्गा

च्छिन्नाशिनी । चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥ ३
० ॥ ततो निशुंभो वेगेन गदामादाय चंडिकां । अभ्यधावत वै
हंतुं । दैत्यसैन्यसमावृतः ॥ ३१ ॥ तस्यापतत एवाशु गदां चि
च्छेद चंडिका । खड्गेन शितधारेण । स च शूलं समाददे । ३
२ ॥ शूलहस्तं समायांतं । निशुंभममरार्दनं । हृदि विव्याध शू
लेन । वेगाविद्धेन चंडिका ॥ ३३ ॥ भिन्नस्य तस्य शूलेन । हृ
दयान्निःसृतोऽपरः । महाबलो महावीर्यस्तिष्ठेति पुरुषो
वदन् ॥ ३४ ॥ तस्य निःक्रामतो देवी । प्रहस्य स्वनवत्ततः । शि
रश्चिच्छेद खड्गेन । ततोऽसावपतद्भुवि ॥ ३५ ॥ ततः सिंहश्चखाद

दोग्रं । दंष्ट्राक्षुण्णशिरोधरान् । असुरांस्तांस्तथा काली । शिवदू
ती तथापरान् ॥ ३६ ॥ कौमारीशक्तिनिर्भिन्नाः । केचिन्नेशुर्महासु
राः । ब्रह्माणीमंत्रपूतेन । तोयेनान्ये निराकृताः ॥ ३७ ॥ माहेश्वरीत्रि
शूलेन । भिन्नाः पेतुस्तथापरे । वाराहीतुंडघातेन । केचिच्चूर्णीकृ
ता भुवि ॥ ३८ ॥ खंडं खंडं च चक्रेण । वैष्णव्या दानवाः कृताः । वज्रे
ण चैंद्रीहस्ताग्रविमुक्तेन तथापरे ॥ ३९ ॥ केचिद्विनेशुरसुराः ॥
केचिन्नष्टा महाहवात् ॥ भक्षिताश्चापरे काली । शिवदूतीमृगा
धिपैः ॥ ४० ॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे दे
वीमाहात्म्ये निशुंभवधः ॥ ९ ॥ ॥ ऋषिरुवाच ॥ निशुंभं नि

दृतंदृष्ट्वा। भ्रातरंप्राणसम्मितं। हन्यमानंबलंचैव। शुंभः क्रुद्धोऽब्र
वीद्वचः॥२॥ बलावलेपाद्दुष्टेत्वं। मादुर्गेगर्वमावह॥ अन्यासां
बलमाश्रित्य। युध्यसेयातिमानिनी॥३॥ देव्युवाच॥ एकैवा
हंजगत्यत्र। द्वितीयाकाममापरा॥ पश्यैताद्दुष्टमय्येव। विशंत्य
त्योमद्विभूतयः॥४॥ ऋषिरुवाच॥ ततःसमस्तास्तादेव्यो। ब्रह्मा
णीप्रमुखालयं। तस्यादेव्यास्तनौजग्मु। रेकैवासीत्तदांबिका॥
५॥ देव्युवाच॥ अहंविभूत्याबहुभि। रिहरूपैर्यदास्थि
ता। तत्संहृतंमयैकैव। तिष्ठाम्याजौस्थिरोभव॥६॥ ऋषिरुवा
च॥ ततःप्रववृतेयुद्धं। देव्याःशुंभस्यचोभयोः। पश्यतांसर्व ५८



देवानां। मसुराणां
च दारुणं॥७॥ श
रवर्षैः शितैः शस्त्रै
स्तथास्त्रैश्चैवदारु
णैः। तयोर्युद्धमभू
द्भूयः। सर्वलोकभ
यंकरं॥८॥ दिव्या
न्यस्त्राणिशतशो
मुमुचेयान्यथांबि

विका। बभंज तानि दैत्येंद्र। स्तत्प्रतीघातकर्तृभिः॥८॥ मुक्तानि तेन
चास्त्राणि। दिव्यानि परमेश्वरी। बभंज लीलयैवोग्र। हुंकारोच्चार
णादिभिः॥९॥ ततः शरशतैर्देवी। माच्छादयत सोऽसुरः। सापि तत्कु ५८
पिता देवी मा॥१०॥ साच्छिन्ने धनुषि दैत्येंद्र। स्तथा शक्तिमथाददे। चि
च्छेद देवी चक्रेण। तामप्यस्य करे स्थितां॥११॥ ततः खड्गमुपादाय
शतचंद्रं च भानुमत्। अभ्यधावत तां देवी। दैत्यानामधिपेश्वरः॥१२॥ म
तस्यापतत एवाशु। खड्गं चिच्छेद चंडिका। धनुर्मुक्तैः शितैर्बाणै। श्च
र्म चार्ककरामलं॥१३॥ अश्वांश्च पातयामास। रथं सारथिना सह
हताश्वः स तदा दैत्य। श्छिन्नधन्वा विसारथिः॥१४॥ जग्राह मुद्गरं घो ५९

रमंबिका निधनोद्यतः। चिच्छेदापततस्तस्य। मुद्गरं निशितैः शरै
॥१५॥ तथापि सोऽभ्यधावत्तां। मुष्टिमुद्यम्य वेगवान्। स मुष्टिं पातय
मास हृदये दैत्यपुंगवः॥१६॥ देव्यास्तं चापि सा देवी। तलेनोर
स्यताडयत्। तलप्रहाराभिहतो। निपपात महीतले॥१७॥ स
दैत्यराजः सहसा। पुनरेव तथोत्थितः। उत्पत्य च प्रगृह्योच्चै। र्दे
वीं गगनमास्थितः॥१८॥ तत्रापि सा निराधारा। युयुधे तेन चंडिका
नियुद्धं खे तदा दैत्य। श्चंडिका च परस्परं॥१९॥ चक्रतुः प्रथमं सि
द्धमुनिविस्मयकारकं। ततो नियुद्धं सुचिरं। कृत्वा तेनांबि
का सह॥२०॥ उत्पाट्य भ्रामयामास। चिक्षेप धरणीतले। स

क्षिप्तो धरणीं प्राप्य। मुष्टिमुद्यम्य वेगवान्॥२१॥ अभ्यधावत दु
ष्टात्मा। चंडिकानिधनेछया। तमायांतं ततो देवी। सर्वदैत्यज
नेश्वरं॥२२॥ जगत्यां पातयामास। भित्वा शूलेन वक्षसि। सगता
सुः पपातोर्व्यां। देवीशूलाग्रविक्षितः॥२३॥ चालयन्सकलां
पृथ्वीं साब्धिद्वीपां सपर्वतां। ततः प्रसन्नमखिलं। हते तस्मिन्दु
रात्मनि॥२४॥ जगत्स्वास्थ्यमतीवाप। निर्मलं चाभवन्नभः॥
उत्पातमेघाः सोल्का ये। प्रागासंस्ते शमं ययुः॥२५॥ सरितोमा
र्गवाहिन्य। स्तथासंस्तत्र पातिते। ततो देवगणाः सर्वे। हर्ष
निर्भरमानसाः॥२६॥ बभूवुर्निहते तस्मिन्। गंधर्वा ललितं ज ६७

गुः। अवादयंस्तथैवान्ये। नन
तुश्चाप्सरोगणाः॥२७॥ ववुः पु
ण्यास्तथा वाताः। सुप्रभोऽभूद्
दिवाकरः। जज्वलुश्चाग्नयः शां
ताः। शांता दिग्जनितस्वना
॥२८॥ इति श्री मार्कंडेयपुरा
णे सावर्णिके मन्वंतरे देवीमा
हात्म्ये शुंभवधः॥१०॥ ॥ऋषि
रुवाच॥ देव्या हते तत्र महा

सुरेंद्रे सेंद्राः सुरा वह्निपुरोगमास्तां। कात्यायनीं तुष्टुवुरिष्टला
ला। द्विकाः शिवक्त्राब्जविकाशिताशाः ॥१॥ देवा ऊचुः ॥ दे
वि प्रपन्नार्तिहरे प्रसीद। प्रसीद मातर्जगतोऽखिलस्य। प्र
सीद विश्वेश्वरि पाहि विश्वं। त्वमीश्वरी देवि चराचरस्य ॥२॥ आ
धारभूता जगतस्त्वमेका। महीस्वरूपेण यतः स्थितासि। अ
पां स्वरूपस्थितया त्वयैतदा। प्याय्यते कृत्स्नमलंघ्यवीर्ये ॥३॥ त्वं
वैष्णवी शक्तिरनंतवीर्या। विश्वस्य बीजं परमासि माया। संमो
हितं देवि समस्तमेतत्। त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥४॥
विद्याः समस्तास्तव देवि भेदाः। स्त्रियः समस्ताः सकला जग द

त्सु ॥ त्वयैकया पूरितमंबयैतत्। का ते स्तुतिः स्तव्यपरापरोक्तिः ॥५॥
सर्वभूता यदा देवी। स्वर्गमुक्तिप्रदायिनी। त्वं स्तुता स्तुतये का
वा। भवंतु परमोक्तयः ॥६॥ सर्वस्य बुद्धिरूपेण। जनस्य हृदि सं
स्थिते। स्वर्गापवर्गदे देवि। नारायणि नमोस्तु ते ॥७॥ कलाकाष्ठा
दिरूपेण। परिणामप्रदायिनि। विश्वस्योपरतौ शक्ते। नाराय
णि नमोस्तु ते ॥८॥ सर्वमंगलमांगल्ये। शिवे सर्वार्थसाधके। शरण्ये
त्र्यंबके गौरि। नारायणि प ॥९॥ सृष्टिस्थितिविनाशानां। शक्तिभू
ते सनातनि। गुणाश्रये गुणमये। नारायणि प ॥१०॥ शरणागतदी
नार्त्त परित्राणपरायणे। सर्वस्यार्तिहरे देवि। नारायणि प ॥११॥ दं

सयुक्तविमानस्थे। ब्रह्माणिरूपधारिणी। कोशांभः।क्षरिके दे
वी। नारायणि न॥१२॥ त्रिशूलचंद्राहिधरे। महावृषभवाहिनी। मा
हेश्वरीस्वरूपेण। नारायणि न॥१३॥ मयूरकुक्कुटवृते। महाशा
क्तिधरेनघे॥ कौमारीरूपसंस्थाने। नारायणि न॥१४॥ शंखच
क्रगदाशार्ङ्ग। गृहीतपरमायुधे। प्रसीद वैष्णवीरूपे। नारायणि
न॥१५॥ गृहीतोग्रमहाचक्रे। दंष्ट्रोद्धृतवसुंधरे। वाराहरूपिणि
शिवे। नारायणि न॥१६॥ नृसिंहरूपेणोग्रेण। हंतुंदैत्यान्कृ
तोद्यमे॥ त्रैलोक्यत्राणसहिते। नारायणि न॥१७॥ किरीटिनि
महावज्रे। सहस्रनयनोज्ज्वले। वृत्रप्राणहरे चैंद्री। नारायणि ६

नमोण॥१८॥ शिवदूतीस्वरूपेण। हतदैत्यमहाबले। घोर
महारावे। नारायणि न॥१९॥ दंष्ट्राकरालवदने। शिरोमा
लभूषणे। चामुंडेमुंडमथने। नारायणि न॥२०॥ लक्ष्मि म
हाविद्ये। श्रद्धेपुष्टिस्वधेध्रुवे। महारात्रेमहामाये। ना
णिण॥२१॥ मेधेसरस्वतिवरे। भूतिबाभ्रवितामसि। नि
प्रसीदेशे। नारायणि न॥२२॥ सर्वतःपाणिपादांते। स
शिरोमुखे। सर्वतःश्रवणघ्राणे। नारायणि न॥२३॥
पेसर्वेशे। सर्वशक्तिसमन्विते। भयेभ्यस्त्राहिनोदेवि
देवीनमोस्तुते॥२४॥ एतत्ते वदनं सौम्यं। लोचनत्रयभू

नः सर्वेभीतिभ्यः कात्यायनि नमोस्तु ते ॥२५॥ ज्वालाकरा
त्युग्रमशेषासुरसूदनं । त्रिशूलं पातु नो भीतेर्भद्रका
लि नमोस्तु ते ॥२६॥ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या ज
गत् सा घंटा पातु नो देवि पापेभ्यो नः सुतानिव ॥२७॥ असु
रासृग्वसापंकचर्चितस्ते करोज्वलः । शुभाय खड्गो भवतु
चंडिके त्वां नता वयं ॥२८॥ रोगानशेषानपहंसि तुष्टा रु
ष्टा तु कामान् सकलानभीष्टान् । त्वामाश्रितानां न विपन्नरा
णां त्वामाश्रिता ह्याश्रयतां प्रयांति ॥२९॥ एतत्कृतं यत्कद
नं त्वयाद्य धर्मद्विषां देवि महासुराणां । रूपैरनेकैर्बहुधात्म

६३

त्ममूर्त्तिं । कृत्वांबिके तत्प्रकरोति कान्या ॥३०॥ विद्यासु शास्त्रे
षु विवेकदीपे । ष्वाद्येषु वाक्येषु च का त्वदन्या । ममत्वगर्ते
तिमहांधकारे । विभ्रामयत्येतदतीव विश्वं ॥३१॥ रक्षांसि य
त्र विषाश्च नागा । यत्रारयो दस्युबलानि यत्र । दावानलो
यत्र तथाब्धिमध्ये । तत्र स्थिता त्वं परिपासि विश्वं ॥३२॥ विश्वे
श्वरी त्वं परिपासि विश्वं । विश्वात्मिका धारयसीति विश्वं ।
विश्वेशवंद्या भवती भवंति । विश्वाश्रया ये त्वयि भक्तिन
म्राः ॥३३॥ देवि प्रसीद परिपालय नोरिभीतेर् । नित्यं यथा
सुरवधादधुनैव सद्यः । पापानि सर्वजगतां प्रशमं नया

श्व। ज्ञतयातयं कज श्नितां स्वमहोपसर्गान्॥३४॥ प्रणतानां
प्रसीदत्वं। देवि विश्वार्तिहारिणि। त्रैलोक्यवासिनामीड्ये।
लोकानां वरदा भव॥३५॥ श्रीदेव्युवाच॥ वरदाहं सुरगणा
वरं यं मनसेच्छथ। तं वृणुध्वं प्रयच्छामि। जगतामुपकारकं
॥३६॥ देवा ऊचुः॥ सर्वबाधाप्रशमनं। त्रैलोक्यस्याखिले
श्वरी। एवमेतत्त्वया कार्यं अस्मद्वैरिविनाशनं ॥३७॥
श्रीदेव्युवाच॥ वैवस्वतेंतरे प्राप्ते। अष्टाविंशतिमे युगे
कलिकाले सुरगणे। निर्जिता स्त्रिदशेश्वराः॥३८॥ इतः
स्वर्गान्न विष्यति। त्रिदशाकार्यसदामरा। विशोकाउकरि ६४

ष्यामि मर्त्यैकादशसंस्थिता॥३९॥ विशोके उ ततो नाम की
र्तयिष्यंति देवताः। शुंभो निशुंभश्चैवान्यो। उत्पत्स्यातमहा
सुरौ॥४०॥ नंदगोपकुले जाता। यशोदागर्भसंभवा। ततस्तौ
नाशयिष्यामि। विंध्याचलनिवासिनि॥४१॥ पुनरप्यतिरौद्रेण
रूपेण पृथिवीतले। अवतीर्य हनिष्यामि। वैप्रचित्तांस्तु दा
नवान्॥४२॥ भक्षयंत्याश्च तानुग्रान्। वैप्रचित्तान्महासुरा
न्। रक्ता दंता भविष्यंति। दाडिमीकुसुमोपमाः॥४३॥ ततो
मां देवताः स्वर्गे। मर्त्यलोके च मानवाः। स्तुवंतो व्याहरिष्यं
ति सततं रक्तदंतिकां॥४४॥ भूयश्च शतवार्षिक्या मना

वृष्ट्यामनंतरसि । मुनिभिः संस्तुता भूमौ । संभविष्याम्ययोनिजा
॥४५॥ ततः शतेन नेत्राणां । निरीक्षिष्यामि यन्मुनीन् । कीर्तयि
ष्यंति मनुजाः । शताक्षीमिति मां ततः ॥४६॥ ततोहमखिलंलो
कं । आत्मदेहसमुद्भवैः । भरिष्यामि सुराः शाकैः । रावृष्टेः प्राण
धारकैः ॥४७॥ शाकंभरीति विख्यातिं । तदा यास्याम्यहं भुवि
तत्रैव च वधिष्यामि । दुर्गमाख्यं महासुरं ॥४८॥ दुर्गादेवीति वि
ख्यातं । तन्मे नाम भविष्यति । पुनश्चाहं यदा भीमं । रूपं कृत्वा
हिमाचले ॥४९॥ रक्षांसि भक्षयिष्यामि । मुनीनां त्राणकारणा
त् । तदा मां मुनयः सर्वे । स्तोष्यंत्यानम्रमूर्तयः ॥५०॥ भीमादे

वीति विख्यातं । तन्मे नाम भविष्यति । यदारुणाख्यस्त्रैलोक्ये । म
हाबाधां करिष्यति ॥५१॥ तदाहं भ्रामरं रूपं । कृत्वासंख्येयषट्
पदं । त्रैलोक्यस्य हितार्थाय । वधिष्यामि महासुरं ॥५२॥ भ्राम
रीति च मां लोकाः । तदा स्तोष्यंति सर्वतः ॥५३॥ इत्थं यदा यदा
बाधा । दानवोत्था भविष्यति । तदा तदावतीर्याहं । करिष्या
म्यरिसंक्षयं ॥५४॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वं
तरे देवीमाहात्म्ये नारायणीस्तुतिः ॥११॥ देव्युवाच ॥ एभि
स्तवैश्च मां नित्यं । स्तोष्यते यः समाहितः । तस्याहं सकलां बा
धां । नाशयिष्याम्यसंशयं ॥१॥ मधुकैटभनाशं च । महिषासुर

घातनं । कीर्त्तयीष्यंतियेतद्वद्‌ वधंशुंभनिशुंभयोः ॥ २ ॥ अष्टम्यां
चचतुर्द्दश्यां । नवम्यांचैकचेतसः । श्रोष्यंतिचैवयेभक्त्या । ममम्मा
हात्म्यमुत्तमं ॥ ३ ॥ नतेषांदुःकृतंकिंचि । दुःकृतोथानचापदः । भवि
ष्यतिनदारिद्र्यं । नचैवेष्टवियोजनं ॥ ४ ॥ शत्रुतोनभयंतेषां । दस्युतो
वानराजतः । नशस्त्रानलतोयौघात्‌ । कदाचित्संभविष्यति ॥ ५ ॥ तस्
मान्ममैतन्माहात्म्यं । पठितव्यंसमाहितैः । श्रोतव्यंचसदाभक्त्या ॥
परंस्वस्त्ययनंमहत्‌ । उपसर्गानशेषांस्तु । महामारीसमुद्भवान्‌ ॥
तथात्रिविधमुत्पातं । माहात्म्यंशमयेन्मम ॥ ७ ॥ यत्रैतत्पठ्यतेसम्य
ग्‌ । नित्यमायतनेमम । सदानतद्विमोक्षामि । सांनिध्यंतत्रमेस्थितं

६

८ ॥ बलीप्रदानेपूजायां । मग्निकार्येमहोत्सवे । सर्वंममैतच्चरित
मुच्चार्यंश्राव्यमेवच ॥ ९ ॥ जानताजानतावापि । बलिपूजांतथाः
कृतां । प्रतीछिष्याम्यहंप्रीत्या । वन्हिहोमंतथाकृतं ॥ १० ॥ शरत्का
लेमहापूजा । क्रियतेयाचवार्षिकी । तस्यांममैतन्माहात्म्यं श्रु
त्वाभक्तिसमन्वितः ॥ ११ ॥ सर्वबाधाविनिर्मुक्तो । धनधान्यसमन्वित
ः मनुष्योमत्प्रसादेन । भविष्यतिनसंशयः ॥ १२ ॥ श्रुत्वाममैतन्मा
हात्म्यं । तथोत्पत्तीःशुभाः । पराक्रमांश्चयुद्धेषु जाय
तेनिर्भयःपुमान्‌ ॥ १३ ॥ रिपवःसंक्षयंयांति । काल्याणंचोपप
द्यते । नंदते कुलंपुंसां । माहात्म्यंममशृण्वतां ॥ १४ ॥ शां

तिकर्म्मणि सर्व्वत्र। तथा दुःस्वप्नदर्शने। ग्रहपीडासु चोग्रासु मा
हात्म्यं शृणुयान्मम॥ १५॥ उपसर्गाः शमं यांति। ग्रहपीडाश्च दा
रुणाः। दुःस्वप्नं च नृभिर्दृष्टं। सुस्वप्नमुपजायते॥ १६॥ बालग्रहा
भिभूतानां। बालानां शांतिकारकं। संघातभेदे च नृणां। मैत्री
करणमुत्तमं॥ १७॥ दुर्वृत्तानामशेषाणां। बलहानिकरं परं
रक्षोभूतपिशाचानां। पठनादेव नाशनं॥ १८॥ सर्वं ममैतन्
माहात्म्यं। मम सांनिध्यकारकं। पशुपुष्पार्घ्यधूपैश्च। गंधदीपै
स्तथोत्तमैः॥ १९॥ विप्राणां भोजनैर्होमैः। प्रोक्षणीयैरहर्निशं।
अन्यैश्च विविधैर्भोगैः। प्रदानैर्वत्सरेण या॥ २०॥ प्रीतिर्मे

क्रियते वास्मिन्। सकृत्सुचरिते श्रुते। श्रुतं हरति पापानि तथारो
ग्यं प्रयच्छति॥ २१॥ रक्षां करोति भूतेभ्यो। जन्मनां कीर्तनं मम। युद्धे
षु चरितं यन्मे। दुष्टदैत्यनिबर्हणं॥ २२॥ तस्मिन्श्रुते वैरिकृतं भ
यं पुंसां न जायते। युष्माभिः स्तुतयो याश्च। याश्च ब्रह्मर्षिभिः कृ
ताः॥ २३॥ ब्रह्मणा च कृता यास्ताः। प्रयच्छंति शुभां मतिं। अरण्ये प्रां
तरे वापि। दावाग्निपरिवारितः॥ २४॥ दस्युभिर्वा वृतः शून्ये। गृही
तो वापि शत्रुभिः। सिंहव्याघ्रानुयातो वा। वने वा वनहस्तिभिः॥ २
५॥ राज्ञा क्रुद्धेन चाज्ञप्तो। वध्यो बंधगतोपि वा। आघूर्णितो वा वाते
न। स्थितः पोते महार्णवे॥ २६॥ पतत्सु चापि शस्त्रेषु। संग्रामे भृ

ग्नादारुणे। सर्व्वबाधासुघोरासु वेदनाभ्यर्द्दितोपिवा। २७। स्मरन्
ममैतच्चरितं नरोमुच्येतसंकटात्। ममप्रभावात्सिंहाद्या दस्यव
वोवैरिणस्तथा। २८। दूरादेवपलायंते स्मरतश्चरितंमम। [illegible]
[illegible]॥ इत्युक्त्वासाभगवती। चंडिकाचंडविक्रमा। २९। पश्यत
तामेवदेवानां तत्रैवांतरधीयत तेपिदेवानिरातंकाः स्वाधिका
रान्यथापुराः। ३०। यज्ञभागभुजःसर्वे चक्रुर्विनिहतारयः।
दैत्याश्चदेव्यानिहते शुंभेदेवरिपौयुधि। ३१। जगद्विध्वंसकेत
स्मिन्महोग्रेतुलविक्रमे। निशुंभेचमहावीर्ये शेषाःपाताल
माययुः। ३२। एवंभगवतीदेवी सानित्यापिपुनःपुनः। संभूय

कुरुतेनृप। जगतःपरिपालनं। ३३। तयैतन्मोह्यतेविश्वं से
वविश्वंप्रसूयते। सायाचिताचविज्ञानं। तुष्टाऋद्धिंप्रयच्छति
३४। व्याप्तंतयैतत्सकलं ब्रह्मांडंमनुजेश्वर। महाकाल्यामहा
काले। महामारीस्वरूपया। ३५। सैवकालेमहामारी सैव
सृष्टिर्भवत्यजा। स्थितिंकरोतिभूतानां। सैवकालेसनातनी
३६। भवकालेनृणांसैव। लक्ष्मीर्वृद्धिप्रदागृहे। सैवाभाव
तथालक्ष्मी। र्विनाशायोपजायते। ३७। स्तुतासंपूजितापुष्पै
र्गंधधूपादिभिस्तथाः। ददातिवित्तंपुत्रांश्च मतिंधर्म्मेगतिंशुभां।
३८। [illegible]

[illegible] ॥ ७५ ॥ [illegible] ॥ ऋषिरुवाच ॥ एतत्तेकथितं।
भूप। देवीमाहात्म्यमुत्तमं। एवंप्रभावासादेवी। ययेदंधार्यते
जगत॥१॥ विद्यातथैवक्रियते। भगवद्विष्णुमायया। तयात्वम
एषवैश्यश्च। तथैवान्येविवेकिनः॥२॥ मोह्यंतेमोहिताश्चैव। मो
हमेष्यंतिचापरे। तामुपैहिमहाराज। शरणंपरमेश्वरीं॥३॥
आराधितासैवनृणां। भोगस्वर्गापवर्गदा॥४॥ [illegible]
[illegible]॥ इतितस्यवचःश्रुत्वा। सुरथःसनराधिपः॥५॥ प्रणिप
त्यमहाभागं। तमृषिंसंशितव्रतं। निर्विण्णोतिममत्वेन। राज्या
पहरणेनच॥६॥ जगामसद्यस्तपसे। सचवैश्योमहामुने॥ हृए

संदर्शनार्थमंबाया।
नदीपुलिनसंस्थित
:॥६॥ सचवैश्यस्तप
स्तेपे। देवीसूक्तंपरं
जपन्। तौतस्मिन्पु
लिनेदेव्याः कृत्वामू
र्तिंमहीमयीं॥७॥
अर्हणांचक्रतुस्त
स्याः। पुष्पधूपाग्नि।

तस्थतुः । निराहारौ जितात्मानौ । तन्मनस्कौ समाहितौ ॥ ८ ॥ द
दतुस्तौ । बलिं चैव । निजगात्रासृगुक्षितं । एवं समाराधयतो । त्रि
भिर्वर्षैर्यतात्मनोः ॥ ९ ॥ परितुष्टा जगद्धात्री । प्रत्यक्षं प्राह चं
डिका ॥ १० ॥ देव्युवाच ॥ यत्प्रार्थ्यते त्वया भूप । त्वया च कु
लनंदन । मत्तस्तत्प्राप्यतां सर्वं । परितुष्टा ददामि तत् ॥ ११ ॥ मार्कं
डेय उवाच ॥ ततो वव्रे नृपो राज्यं । मविभ्रंश्यन्यजन्मनि । अत्र
ैव च निजं राज्यं । हतशत्रुबलं बलात् ॥ १२ ॥ सोपि वैश्यस्ततो ज्ञा
नं । वव्रे निर्विण्णमानसः । ममेत्यहमिति प्राज्ञः । संगविच्युति
कारकं ॥ १३ ॥ देव्युवाच ॥ स्वल्पैरहोभिर्नृपते । स्वं राज्यं प्रा ७७

प्स्यते भवान् । हत्वा रिपूनस्खलितं । तव तत्र भविष्यति ॥ १४ ॥ मृतश्च
भूयः संप्राप्य । जन्म देवाद्विवस्वतः । सावर्णिको मनुर्नाम । भ
वान् भुवि भविष्यति ॥ १५ ॥ वैश्यवर्य त्वया यश्च । वरोस्मत्तोभिवां
छितः । तं प्रयच्छामि संसिद्ध्यै । तव ज्ञानं भविष्यति ॥ १६ ॥ मार्कं
डेय उवाच ॥ इति दत्वा तयोर्देवी । यथाभिलषितं वरं । बभूवांत
र्हिता सद्यो । भक्त्या ताभ्यामभिष्टुता ॥ १७ ॥ एवं देव्या वरं लब्ध्वा सुर
थः क्षत्रियर्षभः । सूर्याज्जन्म समासाद्य । सावर्णिर्भविता मनुः ॥ १
८ ॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये सुरथ
वैश्ययोर्वरप्रदानं नाम त्रयोदशोध्यायः समाप्तः ॥ श्री ॥

॥देव्याईश्वरै नमः॥ऐंद्रस्येव शरासनस्य दधती मध्ये ललाटं प्रभां
शौक्लीं कांतिमनुष्णगोरिव शिरस्यातन्वती सर्वतः॥ एषासौ त्रि-
पुरा हृदि द्युतिरिवोष्णांशोः सदाहःस्थिता॥ छिंद्यान्नः सह
सा पदैस्त्रिभिरघं ज्योतिर्मयी वाङ्मयी॥१॥ या मात्रा त्रपुषीलता-
तनुलसत्तंतुस्थितिस्पर्धिनी॥ वाग्बीजे प्रथमं स्थितां तव स ध
दा तां मन्महे ते वयं॥ शक्तिं कुंडलिनीति विश्वजननव्यापारबद्धो-
द्यमां॥ ज्ञात्वेत्थं न पुनः स्पृशंति जननीगर्भेऽर्भकत्वं नराः॥२
॥दृष्ट्वा संभ्रमकारि वस्तु सहसा ऐं ऐं इति व्याहृतं॥ येनाकूतव-
शादपीह वरदे बिंदुं विनाप्यक्षरं॥ तस्यापि ध्रुवमेव देवि तर व
सा जाते तवानुग्रहे॥ वाचः सूक्तिसुधारसद्रवमुचो निर्यां-
ति वक्त्रोदरात्॥३॥ यन्नित्यं तव कामराजमपरं मंत्राक्षरं

निष्कले तन्सारं स्वतमित्यवति चिर तत्वः कस्त्वं दधत्स्वेद्धवि॥ आ
स्वानं धतिपर्वसत्पतपसाय कीर्तयंतो धिजा॥ प्रणवांस्पंदंवण
यितां नीत्वोच्चरंति स्फुटं॥४॥ यत्त्वं सद्यां वचसां षट्त्रिंकरणं द घव
सा वं बुधे॥ स्मार्ते यं तदहनमामि मनसा तद्वीजमिडंप्रसं॥ अस्त्वो
वापि सरस्वती मुकुगतो जंडयांबुविच्छित्तये॥ गोत्राक्षांगिरिवर्त्तते
सा नियतं योगं विना सिद्धिदं॥५॥ एकोकांत्वदेविवीजमनघं सम्य
ज्जनां व्यंजनं कूटस्थं यदि वा पृथंक्रमगतं यद्वा स्थितं व्युत्क्रमात्॥ यं
यं काममपेक्ष्य येन विधिना केनापि वा चिंतितं जप्तं वा सफलीक
रोति तरसा तं तं समस्तं नृणां॥६॥ वामिकरांधारिणी मलयदां सा क
स्त्रं जंदधि कि णसक्रेस्या वरदानपंत्रालकरांकेधरिं कंदो द्वाली
उज्जं सांबुजपत्रकांतिनयनास्निग्धप्रसाला कनी॥ येवामंवन

प्रारं

त्रीलतयंति मन सानि षां वालि चंक्रतः॥७॥ रिक्षां पांडुरपुंडरीक
लं स्पष्टा सिरास्य सां सि चिंतीमिहृतदतो रिवत्रिरोधमायंति मूर्द्धं
स्थितां अश्रांतं विकटस्फुटाक्षरपदानिर्याति वक्रांबुजात्तेषां भ
रतिचारती स्वरसरिं कल्लोललोलोर्मयः॥८॥ ये सिंदूरपराग
पुंजपिहितां त्वत्तेजसा द्यामिमाः मुर्वी वापि विलीनयावकरसप्र
स्तारमग्नामिद पश्यंति क्षणमप्यनन्यमनसा स्तेषामनंगज्वर
क्लांतास्त्रस्तकुरंगशावविदृशो वश्या भवंति स्त्रियः॥९॥
तव कांचनकुंडलांगदधरं ... कांचीस्वनां चेलांचला
सितफते क्षण मपि ध्यायंति ... क्षिरांति कांवक्रमं मुवि ...
मादद्दद्दस्फारीतवत्सांघ्रिरांमदमत्तके कजर कणोतालं तर ज्ञा

॥ ॐ गिडं दुत्रारेक्षसावग्रघश्वन्नूमिक्षद्विः वार २ कहीजे नूमिक्षव्याधिः॥१॥ ॐ नं दे न
॥६॥ ॐ गिडं दुत्रारे ... रा हाः वा २२ क हीजेरा तण ॥ छिद्रियाधिः
श्रावुनिमंत्रस्यः ... द्वर ऋषि ... रा हाः वा २२ क हीजे॥
२॥ ॐ स्तानिमंत्रस्य ... ब्रह्मा ऋषि इति स्नानछिद्रियाधिः वार २ कहीजे॥
॥३॥ ॐ प्रथम आसन मंत्रस्य पृथ्वी देवता धृता आसन छिद्रि वार २
कहीजेः॥४॥ ॐ ऐं क्रीं क्लीं ऐं नमः वार १०८ कहीजिः॥५॥ ॐ नमः श्री ॐ माहा
विद्या जगनमाता॥ माहात्म्य त्रिविद्याः विष्णुमाया कुलासांताः
सिधा सिद्ध सर्वसतीः ॐ गुरु आज्ञायः वार २ कहीजेः॥६॥ ॐ नमः ॐ क्रीं
श्री माहेश्वरीः धर्मपत्नी स्वाहाः वार १ कहीजे पछे जंत्र वीजेः॥७॥ ॐ स्या ॐ
मामंत्रस्यः ईश्वर ऋषि अनुष्टुप जगती छंदः श्री ईश्वर सिद्धिः श्री स
छेदि दो मिस्वाहाः वार २ क हीजे स्या मा छिद्रियाधिः॥८॥ ॐ नमः श्री ती थे मे
त्रस्यः ब्रह्मा ऋषिः श्री ईश्वरा प्रीत्यर्थे छेदो मिस्वाहाः वार २ कहीजेः॥९॥ ॐ
चोरत्व नस छिद्रि सवतिः वार २ कहीजेः॥१०॥ ॐ पंचम मंत्रस्यः क्रौं हुं ...
ऋषिः अनुष्टुप छंद स्वाहाः वार २ कहीजेः॥११॥ ॐ संरूयाय नमः॥१२॥ ॐ या

मिनीनमः॥१३॥ उँ ह्रौं ह्रौं ह्रौं ह्रै पात्रायनमः॥ इतिद्वारपालपूजा॥
१४॥

॥श्रीगणेशायनमः॥

॥अथभैरवस्तोत्रं॥ ॐ ह्रीं बटुकायआपदुद्धारणाय कुरु कुरु बटुकाय
ह्रीं ॐ नमो बटुकनाथाय ॐ नैरवो हुतनाथस्वर्णुनामोहुतना
वन॥ द्वित्रग द्वित्रपाल स्वर्द्वीत्र द्वात्रिपो विराट॥१॥ रांम
हांनवासीमां मासीनरजरामीस्मरांतक॥ रत्नपपांनपारी
घासेधिद सिंधपविता॥२॥ ॐ श्रावश्राव रांमन श्वाश्चां स्वर
नन्श्रवि॥ त्रिनेत्री बटुकनेत्रस्वनाथापींगलकीवन॥ ३॥

श्रुतपांणीपडगपांणीकंझावीधुमरछीवनतच्मनीहुंनी
रवीनाच्योनतपीजीगनीपती॥८॥धंनदीघंनहारीवघनवी
नत्रतिमांनवांन॥नागहारीनागक्षेरीमीमक्षेराक्षपा
नतक्षावक्षपावमावीवक्षमानिपंक्षवानिधिगा॥वी
नीवज्यवुनीत्रम्न॥त्रीरीपीवात्रिद्वीक्षपदु॥१०॥त्रिनीत्र
तनपीकिंनमांतयातंजुनाग्रिप॥ ॥बटक्षीवऊवेपक्ष्रवं

पतिनुचरात्मज॥ ॥क्षंक्षावधारीमुंडीनत्रांत्रजगीपं
वितवांन॥जंनालीमोहनं॥तं॥लीलाकुंतलात्क्षीनांणरत्ना॥
११॥श्रुचीनीकांजनप्रभोदीलहामुंडनुप्रित॥वलीनुग
बलीनुगताप्योवालीवालप्रानुम॥१२॥मारधापत्रारली
ऊरगाऊमटनुतनिसिवित॥क्षांमीक्षवानिधिक्षांतक्षामिनी
वसांक्षदवसी॥१३॥मारवाधिधिप्रदीवेधप्रनुविम्नु

.75

टवांगवरधारस॥ तुताघद्वीपस्तुपातिंर्वं क्षवार
वारस॥ धुरणीदिग्गंबरा सुरो हरिणंपांडुणीनैन॥१८॥
त्रस्मांतस्मांतिदस्तुधमंकरणीपवांधव॥ अस्तुस्तुस्त
तिधिमस्तस्त गणंतन स्तपोमप॥१९॥ समटाधार
पडाधारस्परणस्तुल्कामिणीमप॥ तुधरीतुधराधीमीन

BIBLIOTECA CIVICA DI UDINE